भाषा-जलके गुणोंमेंसे 'स्नेह' को निकाल गन्धको डालकर गिने तो वेही १४ पृथिवीके गुण हैं, बुद्ध्यादि छः, तथा संख्यादि पञ्च, भावनाख्य संस्कार, तथा धर्म्माधर्म्म ये १४ गुण जीवात्माके हैं, संख्यादि पञ्च कालके तथा दिशाके गुण हैं। संख्यादि पञ्च तथा शब्द ये छः आकाशके गुण हैं ॥ ३२ ॥ ३३ ॥

संख्यादयः पञ्च बुद्धिरिच्छायत्नोऽपि चेश्वरे ॥
परापरत्वे संख्याद्याः पञ्च वेगश्च मानसे ॥ ३४ ॥

भाषा-संख्यादि पञ्च बुद्धि इच्छा यत्न ये आठ ईश्वरके गुण हैं; परत्व अपरत्व संख्यादि पञ्च तथा वेग ये आठ मनके गुण हैं ॥ ३४ ॥

साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति तत्र क्षितिरित्यादिना-

भाषा-समान धर्म्म विपरीत धर्मोंके निरूपणानन्तर 'तत्र क्षिति' इत्यादि ग्रन्थसे मूलकार पृथिवी आदिका निरूपण करता है-

तत्र क्षितिर्गन्धहेतुः-

गन्धहेतुरिति । गन्धसमवायिकारणमित्यर्थः ।

भाषा-उन नवद्रव्योंके मध्यमें गन्धसमवायिकारणका नाम पृथिवी है.

यद्यपि गन्धवत्त्वमात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम् । तथाहि । पृथिवीत्वं हि

गन्धसमवायिकारणतावच्छेदकतया सिद्धयति, अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः । नच पाषाणादौ गन्धाभावाद्गन्धवत्त्वमव्याप्तमिति वाच्यम् । तत्रापि गन्धसत्त्वात् । अनुपलब्धिस्तत्वनुत्कटत्वेनाप्युपपद्यते, कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते । भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सिद्धयति । यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः दृष्टं चैतत् खण्डपटे महापटध्वंसजन्ये ।

भाषा-यद्यपि पृथिवीका लक्षण गन्धवत्त्वमात्र कहना उचित है तथापि लक्षणमें समवायिकारणताका निवेश 'पृथिवीत्व' जातिमें प्रमाण उपन्यासके लिये जानना चाहिये (तथाहि) उसकी रीति यह है कि– गन्धकी जो समवायिकारणता तादृश कारणताका जो अवच्छेदक तादृश अवच्छेदकत्वेन रूपेण पृथिवीत्व जातिकी सिद्धि होती है, (अन्यथा) यदि गन्धत्वावच्छिन्नके प्रति पृथिवीको हेतुता न माने तो गन्धके प्रति नियत कारणताका नियम नहीं रहेगा. शंका–पाषाणरूपा पृथिवीमें गन्धका अभाव होनेसे 'गन्धवत्त्व' रूप लक्षण अव्याप्तिग्रस्त है. समा०--पाषाणरूपा पृथिवीमें गन्ध विद्यमान तो है परन्तु अनुद्भूत गन्ध है. इसलिये उसका उपलाभ नहीं होता (अन्यथा) यदि पाषाणमें गन्ध न होय तो उसकी भस्म (चूना) में गन्धका उपलाभ कैसे होय ? पाषाणकी भस्म पाषाणके ध्वंससे उत्पन्न होती है. याते स्वभस्मका उपादान कारण पाषाण है और पाषाणरूप उपादान निरूपिता तद्भस्ममें उपादेयता सिद्ध होती है । जो (भस्मादि) द्रव्य जिस (पाषाणादि) द्रव्यके ध्वंससे उत्पन्न होता है । वह(भस्मादि) द्रव्य उस(पाषाणादि) द्रव्यरूप उपादानका उपादेय होता है यह लोकमें नियम है,उपादान नाम समवायिकारणका है । उपादेय नाम कार्यका है, यह व्याप्तिनियम हमने महापटके ध्वंससे उत्पन्न होनेवाले खण्डपट (वस्त्रके टुकडे) में देखा है ।

इत्थं च पाषाणपरमाणोः पृथिवीत्वात्तज्जन्यस्य पाषाणस्यापि पृथिवीत्वम् । तथाच तस्यापि गन्धवत्वे बाधकाभावः ।

---

१ समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठकार्य्यतानिरूपिता तादात्म्यसम्बन्धावच्छिन्नपृथिवीनिष्ठा या समवायिकारणत सा किंचिद्धर्मावच्छिन्ना कारणतात्वात् घटनिष्ठकार्य्यतानिरूपितकपालगतकारणतावत्' यह अनुमान पृथवीत्वजातिका साधक है.

भाषा-ऐसेही पाषाणके परमाणुओंको पृथिवी होनेसे उनसे उत्पन्न होनेवाला पाषणभी पृथिवीस्वरूपही है । एवं पाषाणको गन्धवाला होनेमें भी कोई बाधक नहीं है ॥

नानारूपवती मता ।

भाषा-तथा वह पृथिवी नानाविध रूपवाली है.

नानारूपेति । शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते, नतु जलादौ।तत्र शुक्लस्यैव सत्त्वात् पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसम्भवात् । नच यत्र[1] नानारूपं नोत्पन्नं तत्राव्याप्तिः । रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वात् । वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वात् । न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः ।

भाषा-शुक्ल नीलादि भेदसे सात प्रकारका रूप पृथिवीमेंही रहता है, जलादिमें नहीं रहता,जलादिमें तो केवल शुक्लरूपही रहता है और पृथिवीमें तो एक व्यक्ति (घटादि)मेंभी अग्निसंयोगसे नानारूपका सम्भव होता है, शंका-जिस पृथिवीमें नानारूप उत्पन्न नहीं हुआ उसमें अव्याप्ति होगी. समाधान-वहां भी रूपद्वयावाले में वर्तनेवाली जो द्रव्यत्वकी व्याप्य (पृथिवीत्व) रूप जाति तादृश जातिमत्त्व अपेक्षित है, अथवा रूप नाशवालेमें वर्तनेवाली जो द्रव्यत्वकी व्याप्य 'पृथिवीत्व' रूपजाति तादृश जातिमत्त्व अपेक्षित होनेसे उक्त दोष नहीं है,वैशेषिकमतमें पृथिवी-परमाणुओंमें रूपका नाश तथा रूपान्तरकी उत्पत्ति मानी है और न्यायमतमें तो घटादिकोंमेंही रूपको नाश तथा रूपान्तरकी उत्पत्ति मानी है याते उभयमतमें पूर्वोक्त लक्षणमें दोष नहीं है.

षड्विधस्तु रसस्तत्र-

भाषा-षट् प्रकारका उस पृथिवीमें रस है.

षड्विध इति।मधुरकटुकषायादिभेदेन यः षड्विधो रसः स पृथिव्यामेव, जले च मधुर एव रसः । अत्रापि पूर्ववद्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वं लक्षणार्थोऽवसेयः ।

---

[1] प्रथम लक्षण अपेक्षा बुद्धिविशेष विषयत्वरूपद्वित्वघटित होनेसे गौरवयुक्त है या 'रूपनाश' इत्यादिसे द्वितीय कहा है.

भाषा-- मधुर कटु कषायादि भेदसे षट् प्रकारका रस पृथिवीमेंही रहता है जलमें तो केवल एक मधुर रस है. यहांभी जिस पृथिवीमें नानाविध रस उत्पन्न नहीं हुआ, उसमें अव्याप्ति वारणार्थ रसद्वयवालेमें वर्तनेवाली जो द्रव्यत्वकी व्याप्य 'पृथिवीत्व' रूपा जाति तादृश जातिमत्त्वरूप लक्षणार्थ जानना उचित है.

--गन्धस्तु द्विविधो मतः॥३५॥

भाषा--दोप्रकारका उस पृथ्वीमें गंध है ॥ ३५ ॥

गन्धस्त्विति । द्विविध इति वस्तुस्थितिमात्रं नतु द्विविधगन्धवत्त्वं लक्षणं द्विविधत्वस्य व्यर्थत्वात् । द्वैविध्यं च सौरभासौरभभेदेन बोध्यम् ॥ ३५ ॥

भाषा--पृथिवीमें गंधका द्विविध कहना केवल वस्तुकी स्थितिमात्रका बोधक है, द्विविध गंधवत्त्वमात्र लक्षण नहीं है. किन्तु केवल 'गंधवत्त्व' मात्रही लक्षण सम्यक् है. 'द्विविध' पद निष्फल है. सुरभि असुरभि भेदसे वह गंध दोप्रकारका जानना चाहिये ॥ ३५ ॥

स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ।

स्पर्श इति । तस्याः पृथिव्याः ।

भाषा--अनुष्णाशीतपाकज स्पर्श भी पृथिवीका ही जानना योग्य है.

अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्तत इत्युक्तं पाकज इति । इत्थञ्च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तम् । लक्षणं तु पाकजस्पर्शवत्त्वमात्रम् । अधिकस्य वैयर्थ्यात् । यद्यपि पाकजस्पर्शः पटादौ नास्ति, तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः ।

भाषा--अनुष्णाशीत स्पर्शवत्ता वायुमेंभी है उसके वारणार्थ 'पाकज' पदका निवेश किया, वह स्पर्श वायुमें पाकज नहीं है. एवं यह पूर्व ग्रंथ पृथिवीके लक्षणके अभिप्रायसे नहीं कहा किन्तु पृथिवीका स्पर्श अनुष्णाशीत है यह बोधनार्थ कहा है. पृथिवीका लक्षण तो 'पाकजस्पर्शवत्त्वमात्र'ही साधु है; अधिक कथन निष्फल है. यद्यपि पाकज स्पर्शवत्ता पटादिरूप पृथिवीमें नहीं है याते उक्त लक्षणकी अव्याप्ति होगी तथापि पाकज स्पर्शवालेमें वर्तनेवाली जो द्रव्यत्वकी व्याप्य 'पृथिवीत्व' रूपा जाति तादृश 'जातिमत्त्व' पटादि रूप पृथिवीमेंभी प्रसिद्ध है. एवं जातिघटित लक्षण करनेसे कहीं दोष नहीं.

नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा ३६॥
अनित्या तु तदन्या स्यात्सैवावयवयोगिनी ।

भाषा-नित्या तथा अनित्या भेदसे वह पृथिवी दोप्रकारकी है. उसमें परमाणुरूप पृथिवी नित्या है ॥३६॥ उसमें भिन्न कार्य्यरूपा सावयव पृथिवी अनित्या है ।

नित्येति । सा पृथिवी द्विविधा नित्याऽनित्या चेत्यर्थः । अणुलक्षणापरमाणुरूपा पृथिवी नित्या ॥ ३६ ॥ तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपा सर्वाऽप्यनित्येर्थः । सैवानित्या पृथिव्येवावयववतीर्त्थः ।

भाषा-वह पृथिवी दोप्रकारकी है, एक नित्याहै और दूसरी अनित्याहै इन दोनोंमें अणुलक्षणा अर्थात् परमाणुरूपा पृथिवी नित्या है ॥ ३६ ॥ और परमाणुओंसे भिन्न द्व्यणुकादि रूपा यावत् पृथिवी अनित्या है. वह अनित्या पृथ्वी ही अवयवयोगिनी अर्थात् सावयवा कही जाती है.

नन्ववयाविनि किं मानम् ,परमाणुपुञ्जैरेवोपपत्तेः॥न च परमाणूनामतीन्द्रियत्वाद्घटादेः प्रत्यक्षं न स्यादिति वाच्यम्, एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वसम्भवात् । यथैकस्य केशस्य दूरेऽप्रत्याक्षत्वेऽहि तत्समूहस्य प्रत्यक्षत्वम् । न चैकः स्थूलो महान् घट इति बुद्धेरनुपपत्तिरिति वाच्यम् ।

बौद्ध-शंका-सावयवा पृथ्वीमें क्या प्रमाण है ? 'अयंघटः' इत्यादि प्रतीतिका निर्वाह तो विलक्षण संस्थान विशिष्ट परमाणुपुंजसेही होसकताहै; सिद्धांती--परमाणु तो अतीन्द्रिय पदार्थ हैं. यदि घटापि पदार्थोंको परमाणु पुञ्जस्वरूप माने तो परमाणुओंकी तरह घटादिकाभी प्रत्यक्ष नहीं होगा. बौद्ध-यद्यपि पृथक्२ यावत् परमाणु अतीन्द्रिय हैं तथापि उनके समुदायका साक्षात्कार होसक्ता है.जैसें एक(केश) बाल दूरसे नहींभी दीखता तौभी उसके समुदायका प्रत्यक्ष होसकताहै. सिद्धांती यह एक महत्त्व परिमाणवाला स्थूल घट है ऐसी बुद्धि परमाणुपुंजमें नहीं होसकती.

एको महान् धान्यराशिरितिवदुपपत्तेः। मैवम् । परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगात् । दूरस्थकेशस्तु नातीन्द्रियः, सन्निधाने तस्यैव प्रत्यक्षत्वात् । नच तदानीमदृश्यंपर-

माणुपुञ्जाद्दृश्यपरमाणुपुञ्जस्योत्पन्नत्वान्न प्रत्यक्षत्वे विरोध इति वाच्यम् । अदृश्यस्य दृश्यानुपादानत्वात् । अन्यथा चक्षुरूष्मादिसन्ततेरपि कदाचिद्दृश्यत्वं स्यात् ।

बौद्ध–यह एक महान् धान्यराशि है, इस बुद्धिकी तरह घटमेंभी बुद्धि होसकती है, समाधान–परमाणु अतीन्द्रिय हैं उनका समूहभी प्रत्यक्षके योग्य नहीं है; दूरस्थ केश तो अतीन्द्रिय नहीं है नेत्रादिकोंके समीप होनेसे उसी केशका प्रत्यक्षभी होसक्ता है, शंका–कार्य्यउत्पत्तिकालमें दर्शनायोग्यपरमाणुपुंजसे दर्शनयोग्य परमाणुपुंजकी उत्पत्ति होतीहै, याने घटादिके साक्षात् होजानेमें कोई विरोध नहीं. समाधान–अदृश्यपदार्थ दृश्यपदार्थका उपादान नहीं होसकता है, (अन्यथा) यदि अदृश्यपदार्थसेभी दृश्यपदार्थकी उत्पत्ति होवे तो कदाचित् नेत्र इन्द्रियका तथा (ऊष्मा) भाफादि अदृश्य तेजःपदार्थोंकाभी साक्षात्कार होना चाहिये ।

न चातितप्ततैलादौ कथमदृश्यदहनसन्ततेर्दृश्यदहनोत्पतिरिति वाच्यम् । तत्र तदन्तःपातिभिर्दृश्यैरेव दहनावयवैः स्थूलदहनोत्पत्तेरभ्युपगमात् । न चादृश्यद्व्यणुकेन कथं त्रसरेणोरुत्पत्तिरिति वाच्यम् । यतो न वयं दृश्यत्वमदृश्यत्वं वा कस्यचित् स्वभावादाचक्ष्महे किंतु महत्त्वोद्भूतरूपादिकारणसमुदायवशाद्दृश्यत्वम् । तदभावे चादृश्यत्वम् । तथा च त्रसरेणोर्महत्त्वात्प्रत्यक्षं न तु द्व्यणुकादेस्तदभावात् । न हि त्वन्मतेऽपीदं सम्भवति, परमाणौ महत्त्वाभावात् ।

शंका–अतितप्त तैलादिकों विषे कैसे अदृश्य अग्निके भागोंसे दृश्य अग्निभागोंकी उत्पत्ति होतीहै अर्थात् अतितप्त तैलादि पदार्थ पात्रव्यवहित अग्निसंयोगसे भी शीघ्र जल उठतेहैं;वहां प्रथम उनमें दहनसंतति अ दृश्य होतीहै, पश्चात् दृश्य होजाती है. समाधान–वहांभी हम ऐसा मानते हैं कि, दर्शनयोग्य अग्निके भागोंने तैलादि पदार्थमें प्रविष्ट होकर स्थूलदाहकी उत्पत्ति करी है; याते अदृश्यसे दृश्यकी उत्पत्ति नहीं है. शंका–अदृश्य द्व्यणुकसे दृश्य त्रसरेणुकी उत्पत्ति आपने कैसे मानी है ? समा०–इसी कारणसे हम दर्शनयोग्यता अथवा अदर्शनयोग्यता किसी पदार्थको स्वरूपसे नहीं कहते किन्तु महत्त्व परिमाण उद्भूतरूपादि कारणसमुदायसे पदार्थोंमें दर्शनयोग्यता होतीहै इनके अभावसे पदार्थ अदृश्य रहताहै,इसरीतिसे त्रसरेणुका महत्त्वपरिमाण होनेसे प्रत्यक्ष होसकता है द्व्यणुकका महत्त्वपरिमाणके अभावसे

प्रत्यक्ष नहीं होसकता इसी नियमसे तुम्हारे मतमें तो निर्वाह नहीं होसकता. क्योंकि आपने परमाणुपुंजकाकोही प्रत्यक्ष माना है और परमाणुमें महत्त्वरूप कारणके अभावसे प्रत्यक्ष योग्यता नहीं है.

इत्थं चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षत्वादनित्यत्वम् । तेषां चावयवधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसंगः । अतः क्वचिद्विश्रामो वाच्यः । यत्र च विश्रामस्तस्याऽनित्यत्वे त्वसमवेतभावकार्य्योत्पत्तिप्रसङ्ग इति तस्य नित्यत्वम् । महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः ।

भाषा-इस पूर्वोक्तविचारसे (अवयवी) कार्यद्रव्यकी सिद्धि हुई तो उन कार्यद्रव्योंको उत्पन्न विनष्ट होनेसे अनित्यत्व स्पष्ट है; उन कार्य्यद्रव्योंकी अवयवपरंपरा यदि असंख्यात मानी जाय तो मेरुपर्वत तथा (सर्षप) सर्सोंके दानेकी तुल्यता होनी चाहिये; याते किसी एक स्थलमें अवयवपरंपराका विश्राम कहना उचितहै,जहां अवयव परंपराका पर्यवसान है यदि उसको अनित्य मानाजाय तो समवायिकारणसे विनाही भाव कार्यकी उत्पत्ति होनी चाहिये;सो तो संभवनहीं,याते अवयवपरंपराकी विश्राम अवधिको नित्य मानना उचित है. जैसे महत्परिमाणकी न्यूनाधिकता त्रसरेणुसे लेकर आकाशादिकोंमें विश्रामको प्राप्त होतीहै वैसेही अणुपरिमाणकी न्यूनाधिकताकी विश्रान्तिकी अवधिभी कहीं कहनी उचित है, अणुपरिमाणकी न्यूनाधिकताकी विश्रान्तिकी अवधि जहां है वही परमाणु है इसरीतिसे परमाणुकी सिद्धि होसकती है.

न च त्रसरेणावेव विश्रमोऽस्त्विति वाच्यम् । त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वाद्घटवादित्यनुमानेन तदवयवसिद्धौ, त्रसरेणोरवयवाः सावयवा महदवयवत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः ।

शंका-अणुपरिमाणकी विश्रामावधि त्रसरेणुमेंही मानलें तो दोष क्या है ?
समा०-त्रसरेणु घटकी तरह नेत्रग्राह्य होनेसे सावयव हैं, इस अनुमानसे त्रसरेणुके अवयव सिद्ध होनेसे पश्चात् त्रसरेणुके अवयवभी त्रसरेणुरूप महान्कार्यके आरम्भक होनेसे सावयव हैं जैसे कपाल घटरूप महान् कार्य्यके आरम्भक होनेसे सावयव हैं, इस अनुमानसे त्रसरेणुके अवयवोंकेभी अवयव सिद्ध होसकते हैं ।

न चेदमप्रयोजकम् । अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यत्वस्य प्रयोजकत्वात् । न चैवं क्रमेण तदवयवधारापि सिद्धयोदिति वाच्यम्, अनवस्थाभयेन तदसिद्धेः ।

शंका–इस पूर्वोक्त अनुमानमें अनुकूल तर्कका अभाव है. समाधान–अपकृष्ट महत्त्वके प्रति अनेकद्रव्यको कारणतारूपही अनुकूलतर्क प्रसिद्ध है । शंका–इसी क्रमसे उन अवयवोंकी धाराभी सिद्ध हो तो क्या हानि है?समाधान–अनवस्थारूप दोषके भयसे तथा मेरु सर्सोंके साम्यप्रसंगके भयसे अवयवोंकी धारा माननी अनुचित है इससे अणुपरिमाणकी विश्रांतिकी अवधि परमाणुनामक पदार्थ सिद्ध हुआ.

सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥ ३७ ॥

सा च त्रिधेति । सा कार्यरूपा पृथिवी त्रिविधा शरीरेंद्रियविषयभेदादित्यर्थः ॥ ३७ ॥

भाषा–वह कार्यरूपा पृथ्वी शंरीरभेदसे तथा इंद्रियभेदसे तथा विषयभेदसे तीन प्रकारकी है ॥ ३७ ॥

तत्र देहमुदाहरति, योनिजादीति–

भाषा–उनमें 'योनिजादि' इत्यादि ग्रंथसे मूलकार देहके भेदको दिखलाता है–

योनिजादि भवेद्देहं–

योनिजमयोनिजं चेत्यर्थः ।

भाषा–योनिज तथा अयोनिजभेदसे वह देह दो प्रकारका है.

योनिजमपि जरायुजमण्डजं च । जरायुजं मानुषादीनाम्, अण्डजं सर्पादीनाम् । अयोनिजं स्वेदजोद्भिज्जादिकम् । स्वेदजाः कृमिदंशाद्याः, उद्भिज्जास्तरुगुल्माद्याः । नारकिणां शरीरमप्ययोनिजम् ।

भाषा–योनिजशरीरभी जरायुज तथा अण्डजभेदसे दो प्रकारके हैं. उनमें पुरुषादिकोंके शरीर जरायुज कहे जाते हैं; तथा सर्पादिकोंके शरीर अण्डज कहे जाते हैं तैसे अयोनिज शरीरभी स्वेदज तथा उद्भिज्ज भेदसे दो प्रकारके हैं. पसीनेसे उत्पन्न होनेवाले कीटदंशादिक जीव स्वेदज कहेजातेहैं; तथा भूमिके भेदनसे उत्पन्न होनेवाले

वृक्षलतादिके शरीर उद्भिज्ज कहे जाते हैं. नरकमें होनेवाले जीवोंके शरीरभी अयोनिजहीं हैं; याते पृथक् परिगणन नहा किये.

न च मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यम्, गन्धादिमत्त्वस्यैव प्रमाणत्वात् । न च क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम्, तथा सति जलत्वपृथिवीत्वादिना सङ्करप्रसङ्गात् । न च तर्हि जलत्वादिकमेवास्तु, न तु पार्थिवत्वमिति वाच्यम् । क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात्, गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः । तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम् ।

शंका-पूर्वोक्त पुरुषादिकोंके शरीर पृथ्वीसे उत्पन्न होनेवाले हैं इसमें क्या प्रमाण है?समाधान-पुरुषादिकोंके शरीर पार्थिव हैं; गन्धवाले होनेसे किंवा शुक्लेतररूपवाले होनेसे 'घटादिवत्' इत्याकारक अनुमानही प्रमाण है. शंका-पुरुषादि शरीरोंमेंही कदाचित् स्वेदादिसे गीलापना और कदाचित् ज्वरादिकोंसे उष्णता प्रतीत होतीहै, इससे पुरुषादि शरीरोंको जलसे उत्पन्न होनेवाले किंवा तेजसे उत्पन्न होनेवालेभी कहना चाहिये. समाधान-ऐसा माननेसे जलत्व जातिका तथा पृथ्वीत्व जातिका परस्पर संकर होगा. शंका-यदि ऐसाही है तो इन शरीरोंको जलसे वा तेजसे उत्पन्न होनेवाला माननाही उचित है और पार्थिव मानना व्यर्थ है.समाधान शरीरसे गीलेपनेके विनाशके पश्चात् किंवा उष्णताके विनाशके पश्चात्भी पुरुषादि शरीरोंमें 'यह वही देवदत्तका शरीर है.' इत्याकारक शरीरत्वरूपसे प्रत्यभिज्ञात्मक ज्ञान होताहै और गन्धके तथा श्वेतेतररूपादिकोंके उपलाभ होनेसे पुरुषादिशरीरोंमें पार्थिवत्व निश्चय होताहै, पुरुषादिशरीरोंको पार्थिव सिद्ध होनेसे इनमें जलादिभूतोंको निमित्तकारणमात्र जानना चाहिये. पुरुषादिशरीरोंमें पाञ्चभौतिकत्वव्यवहारभी पञ्चभूतजन्यत्वमात्रको लेकर है किन्तु उपादान तात्पर्यस नहीं है ।

शरीरत्वं न जातिः पृथिवीत्वादिना साङ्कर्यात्, किंतु चेष्टाश्रयत्वम् । वृक्षादीनामपि चेष्टासत्त्वान्नाव्याप्तिः । नच वृक्षादीनां शरीरत्वे किं मानमिति वाच्यम् । आध्यात्मिकवायुसम्बन्धस्य

---

१ यहां संकरका प्रकार ऐसा है कि पृथ्वीत्वधर्मको छोडकर शरीरत्वधर्म जलादिशरीरोंमें है ऐसे शरीरत्वधर्मको छोडकर पृथ्वीत्व घटादिकोंमें है एवं दोनों धर्मोंका समावेश मानुषादिशरीरोंमें है याते पूर्वोक्तसंकरका लक्षणसमन्वय हो सकता है ।

प्रमाणत्वात् । तत्रैव किं मानमिति चेत्, भग्नक्षतसंरोहणादिना तदनुमानात् ।

भाषा-पृथ्वीत्वादिजातियोंके साथ संकर होनेसे शरीरत्व जाति नहीं है,किंतु उपाधि है, चेष्टाके आश्रयका नाम शरीर है यह उसका निर्वचन है.(चेष्टा)क्रियाका व्याप्य जातिविशेष है, सो "चेष्टते२" इत्यादि व्यवहारसे प्रत्यक्ष सिद्ध है वह चेष्टा वृक्षादि शरीरोंमेंभी है याते उनमें अव्याप्ति नहीं है. शंका-वृक्षादिकोंके शरीर होनेमें क्या प्रमाण है?समाधान-वृक्षादिकोंमें प्राणवायुका सम्बन्ध ही उनके शरीर होनेमें प्रमाण है. शंका-वृक्षादिकोंमें प्राणवायुका सम्बन्ध है, इसीमें क्या प्रमाण है?समाधान-१ वृक्षादिके स्वयं फूटनेसे. २तथा वृक्षादि शरीरोंमें स्वयं (विस्फोट) गूमडा होजानेसे, ३ एवं वृक्षदिके परस्पर एक दूसरेपर संरोहण होजानेसे, ४ तथा वृक्षादिके वर्द्धनसे वृक्षादिकोंमें प्राणवायुका अनुमान होता है.

यदि हस्तादौ शरीरव्यवहारो न भवति, तदाऽन्त्यावयवित्वेन विशेषणीयम् । न च यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वाच्यम्, तादृशे प्रमाणाभावात् । अथवा चेष्टावदन्त्यावयविमात्रवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं तत्, मानुषत्वचैत्रत्वजातिमादाय लक्षणसमन्वयः । न च नृसिंहशरीरे कथं लक्षणसमन्वयः, तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावात् । जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यम् । कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात् ॥

शंका-पूर्वोक्त क्रियाविशेषरूप चेष्टा हस्त पादादिकोंमेंभी रह सकती है परन्तु वहां शरीरव्यवहार कोई नहीं करता. समाधान-यदि ऐसा है तो "अन्त्यावयवित्वे सति चेष्टाश्रयत्वम्" ऐसा लक्षण करनेसे दोष नहीं, द्रव्यान्तरके अनारम्भकका नाम 'अन्त्यावयवी' है ऐसा शरीर है, हस्तपादादि नहीं हैं. शंका-जिस शरीरमें चेष्टा नहीं

---

१ देवत्वधर्मभी संकरदोषसे दूषित होनेसे जातिरूप नहीं है. उसका प्रकार यह है कि, देवत्व धर्मको छोडकर तैजसत्व धर्म स्वर्णादि तैजस पदार्थोंमें रहता है. एवं तैजसत्वधर्मको छोडकर देवत्व जलीय देवोंमें है. उभयका समावेष तैजसदेवोंके शरीरमें है. इसीलिये देवत्वधर्म जातिरूप नहीं है ।

उत्पन्न हुई उसमें पूर्वोक्तलक्षणकी अव्याप्ति होगी. समाधान–ऐसे शरीरमें प्रमाण नहीं है, शंका–मृतशरीरमें चेष्टा नहीं है परन्तु शरीर व्यवहार होता है, समाधान–यदि ऐसा है तो चेष्टावाला जो अन्त्यावयवी उसमें वर्तनेवाली जो द्रव्यत्वकी व्याप्य (मानुषत्व आदिजाति)तादृश जातिमत्त्वपूर्वोक्तलक्षणका विवरण करना उचित है,ऐसा जातिघटित लक्षण करनेसे दोष नहीं. मानुषत्व चैत्रत्वादि जातिको लेकर लक्षणसमन्वय हो सकता है, शंका–नृसिंहके शरीरमें कैसे लक्षणसमन्वय होगा?वहां 'नृसिंहत्व' धर्मको एकव्यक्तिमें रहनेवाला होनेसे जातिरूपता नहीं है, समाधान–नृसिंहशरीरमें देवत्वजातिको लेकर लक्षणसमन्वय हो सकता है. शंका–जलीयशरीरोंमें तथा तैजसशरीरोंमें वर्तनेवाला होनेसे देवत्वधर्मभी जातिरूप नहीं है, समाधान–कल्पकल्पन्तरोंके भेदसे नृसिंहके शरीरोंकोभी अनन्त होनेसे लक्षणसमन्वय हो सकता है।

–इन्द्रियं घ्राणलक्षणम् ।

इन्द्रियमिति । घ्राणेन्द्रियं पार्थिवमित्यर्थः ।

भाषा–इन्द्रियोंमेंसे घ्राण नामक इन्द्रिय पृथ्वीसे उत्पन्न होता है.

पार्थिवत्वं कथमिति चेत् । इत्थम् । घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत् । नच दृष्टान्ते स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यम् । परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् ।

शंका–'घ्राणइन्द्रिय पार्थिव है' इसमें क्या प्रमाण है ? समाधान–जैसे कुंकुम (केसर)के गन्धका अभिव्यंजक गोघृत कुंकुमके रूपादिकोंका अभिव्यंजक न होकर केवल कुंकुमके गन्धकाही व्यंजक है और पार्थिवभी है, वैसेही घ्राणइन्द्रियभी रूपादिकोंके मध्यमें केवल गन्धकाही व्यंजक होनेसे पार्थिव सिद्ध होता है शंका–घृतरूप दृष्टान्त कुंकुमयोगसे उसके गन्धका व्यंजक होकर अपने रूपकाभी व्यंजक है, इसलिये पूर्वोक्त हेतु दृष्टान्तमें स्वरूपासिद्ध है, समाधान–परकीयरूपादिकोंके अव्यंजक होकर केवल गन्धकेही व्यंजक होना पूर्वोक्त हेतुका अर्थ है, ऐसा हेतु घृतरूप दृष्टान्तमें सिद्ध है,क्योंकि घृत अपनेसे पर कुंकुमके रूपादिकोंका व्यंजक न होकर केवल गन्धकाही व्यंजक है.

न च नवशरावगन्धव्यञ्जकजलेनैकान्तिकत्वमिति वाच्यम्, तस्य सक्तुरसाभिव्यञ्जकत्वात् । यद्वा परकीयेति न देयं वायूपनी-

तसुरभिभागस्य दृष्टान्तत्वसम्भवात् । न च घ्राणेन्द्रियसान्निकर्षस्य गन्धमात्रव्यञ्जकत्वात्तत्र व्यभिचार इति वाच्यम्, द्रव्यत्वे सतीति विशेषणात् ॥

शंका–पूर्वोक्त हेतु जलमें व्यभिचारी है; क्योंकि जलभी नवीन शराव (प्याले) के गन्धकाही व्यंजक है. समाधान–नवीन शरावके गन्धका व्यंजक जल केवल गन्धकाही व्यंजक नहीं है, किन्तु संक्तु (सत्तू) के रसकाभी व्यंजक है; याते पूर्वोक्त हेतु जलमें व्यभिचारी नहीं अथवा लाघवानुरोधसे पूर्वोक्त हेतुमें 'परकीय' यह पद न देना और घृतको दृष्टान्त भी न रखना चाहिये. वायुवेगसे देशान्तरमें प्राप्त जो पुष्पादिकोंके सुगन्धित भाग वे दृष्टान्त बन सकते हैं; क्योंकि वे रूपादिकोंके मध्यमें केवल गन्धकेही व्यंजक हैं और पार्थिव भी हैं. शंका–घ्राणइन्द्रियका जो अपने गन्धरूप विषयके साथ 'स्वसंयुक्तसमवाय' संबन्ध है उसको केवल गन्धकाही व्यंजक होनेसे उसी संबन्धमें पूर्वोक्त हेतुका व्यभिचार होगा. समाधान–पूर्वोक्त हेतुमें 'द्रव्यत्वे सति' यह विशेषण देना उचित है अर्थात् द्रव्य होकर रूपादिकोंके मध्यमें गन्धकाही व्यंजक होना चाहिये. एवं पूर्वोक्त संबन्ध द्रव्य नहीं. याते दोष नहीं.

विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ॥३८॥

भाषा–द्व्यणुकादिसे लेकर ब्रह्माण्डपर्यन्त विषयरूपा पृथ्वी है ॥ ३८ ॥

विषय इति । उपभोगसाधनं विषयः । सर्वमेव हि कार्यजातमदृष्टाधीनम् । यत्कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात् परम्परया वा जनयत्येव । न हि बीजप्रयोजनाभ्यां विना कस्य चिदुत्पत्तिरस्ति, तेन द्व्यणुकादिब्रह्माण्डान्तं सर्वमेव विषयो भवति । शरीरेन्द्रिययोर्विषयत्वेपि प्रकारान्तरोपन्यासः शिष्यबुद्धिवैशद्यार्थः ॥ ३८ ॥

भाषा–सुखदुःखसाक्षात्कारके प्रयोजनका नाम विषय है, साक्षात् अथवा परंपरासंबन्धसे कार्यसंपादकका नाम प्रयोजक है, सम्पूर्ण कार्यसमुदाय जीवोंके अदृष्टोंके अधीन है, जो कार्य जिस जीवके जिस अदृष्टके अधीन है वह कार्य उसी जीवको उसी अदृष्टके अनुसार साक्षात् अथवा परम्परासम्बन्धसे सुखदुःख साक्षात्कारका प्रयोजक होता है, इस संसारमें कारण अथवा प्रयोजनसे विना किसी वस्तुकी भी उत्पत्ति नहीं है; याते द्व्यणुकादिसे लेकर ब्रह्माण्डपर्यन्त सम्पूर्ण विषय हो सकता है, विषयके पूर्वोक्त लक्षणानुसार यद्यपि शरीर तथा इन्द्रियकी

गणना भी विषयकेही अन्तर्भूत करनी उचित है तथापि जुदा परिगणन केवल शिष्यलोगोंकी बुद्धिविशदार्थ है ॥ ३८ ॥

जलं निरूपयति, वर्णः शुक्ल इति—

भाषा—'वर्णः शुक्ल' इत्यादि ग्रन्थसे मूलकार जलका निरूपण करता है—

वर्णः शुक्लः—

भाषा—जलका शुक्ल अर्थात् सफेद वर्ण है.

स्नेहसमवायिकारणतावच्छेदकतया जलत्व जातिः सिद्ध्यति। यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकम्, तथापि जन्यस्नेहत्वं तथा बोध्यम्। अथ परमाणौ जलत्वं न स्यात्, तत्र जन्यस्नेहाभावात्। नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमादिति चेत्, न। जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ, तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः। शुक्लरूपवत्त्वमेव दर्शयितुमुक्तं 'वर्णः शुक्ल' इति। न तु शुक्लरूपवत्त्वं लक्षणम्।

भाषा—स्नेहरूप कार्य्यकी समवायिकारणताकी अवच्छेदक होनेसे जलत्वरूपा जाति सिद्ध है, यद्यपि स्नेहत्वरूप धर्म नित्य जल तथा अनित्य जल उभयमें वृत्ती होनेसे कार्यताका अवच्छेदक नहीं हो सकता तथापि जन्यस्नेहत्वरूप धर्मकार्यताका अवच्छेदक जानना चाहिये. शंका—परमाणुओंमें जलत्वजातिकी सिद्धि न होगी; क्योंकि वहां जन्य स्नेह नहीं है, यदि स्नेहरूप कार्य्यके प्रति जलीयपरमाणुओंमें स्वरूपयोग्यतारूप कारणता माने तो उस स्वरूपयोग्यतारूप कारणतासे कदाचित् फलभी

---

१ 'समवायसम्बन्धावच्छिन्नस्नेहत्वावच्छिन्नस्नेहनिष्ठकार्य्यतानिरूपिता तादात्म्यसम्बन्धावच्छिन्ना या जलनिष्ठा समवायिकारणता सा किंचिद्धर्मावच्छिन्ना कारणतात्वात्' इत्यादि।

२ 'समवायसम्बन्धावच्छिन्नजन्यस्नेहत्वावच्छिन्नजन्यस्नेहनिष्ठजन्यतानिरूपिता। तादात्म्यसम्बन्धावच्छिन्ना या जन्यजलनिष्ठा समवायिकारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्' इत्यादि।

३ 'एवं समवायसम्बन्धावच्छिन्नजन्यजलत्वावच्छिन्नजन्यजलनिष्ठाजन्यतानिरूपिता तादात्म्यसंबन्धावच्छिन्ना या शुद्धजलनिष्ठा समवायिकारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्' इत्यादि [इन प्रयोगोंसे शुद्धजलत्वजातिकी सिद्धि होती है]

अवश्य होना चाहिये, सो तो नहीं होता; याते स्नेहरूप कार्यकी समवायिकारणताकी अवच्छेदक एक अनुगत जलत्व जातिकी सिद्धि नहीं हो सकती. समाधान-जन्य स्नेहनिष्ठ जन्यता निरूपित जो जन्यजलनिष्ठा जनकता तादृश जनकताकी अवच्छेदक होनेसे जन्यजलमें जलत्वजाति सिद्ध हुए पश्चात् जन्यजलानिष्ठ जन्यतानिरूपित जो शुद्ध जलनिष्ठा जनकता तादृश जनकताकी अवच्छेदक होनेसे शुद्ध जलत्वजातिकी सिद्धि होती है, जलका रूप श्वेत है, केवल यह दिखलानेके लिये मूलमें " वर्णः शुक्लः " यह पाठ लिखा है; किन्तु श्वेतरूपवत्त्व जलका लक्षण नहीं है.

अथवा नैमित्तिकद्रवत्ववद्वृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्, अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः । तेन स्फटिकादौ नातिव्याप्तिः ।

भाषा-अथवा नैमित्तिक द्रवणवाले जो 'पृथिवी तेज' उनमें न वर्तनेवाली तथा रूपवालेमें वर्तनेवाली जो द्रव्यत्वकी साक्षात् व्याप्य 'जलत्व' जाति तादृश जातिवाले होना जलका लक्षण है;किंवा अप्रकाशक श्वेतरूपसे इतर जो'नीलपीतादि तथा प्रकाशक श्वेतरूप' उनका असमानाधिकरण होकर रूपवद् जो जल उसमें वर्तनेवाली जो द्रव्यत्वकी साक्षात् व्याप्य जलत्वजाति तादृश जातिमत्ताही पूर्वोक्त " वर्णः शुक्लः " इस ग्रन्थका अर्थ है, एवं लक्षण करनेसे स्फटिकमणिआदिमें अतिव्याप्ति नहीं है,अन्यथा शुक्ल वर्णवत्त्वेन स्फटिकमणिरूप पृथिवीमें अतिव्याप्ति स्पष्टही थी.

-रसस्पर्शौ जले मधुरशीतलौ ।

भाषा-जलमें रस तथा स्पर्श यथाक्रम मधुर तथा शीतल है.

रसस्पर्शाविति । जलस्य मधुर एव रसः । शीत एव स्पर्शः । तिक्तरसवद्वृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः, तेन शर्करादौ नातिव्याप्तिः । ननु शुक्लरूपवत्त्वमेवेति कुतः, कालिन्दीजलादौ नीलोपलब्धेरिति चेत्, न । नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जले नीलरूपासम्भवात् । कालिन्दीजले नीलत्वप्रतीतिस्त्वाश्रयौपाधिकी । अत एव वियति विक्षेपे धवलिमोपलब्धिः ।

भाषा-अर्थात् जलमें रस मधुरही है, तथा स्पर्श शीतही है, इसका भी तिक्तादि रसवालेमें न वर्तनेवाली तथा मधुररसवालेमें वर्तनेवाली जो द्रव्यत्वकी साक्षात् व्याप्य जलत्वजाति तादृश जातिमत्ता जलका लक्षण है, ऐसा जातिघटित लक्षण करना उचित है, ऐसा कहनेसे चीनी शक्कर आदिमें अतिव्याप्ति भी नहीं है, क्योंकि ये पार्थिव हैं, इनमें रहनेवाली पृथ्वीत्व जाति तिक्तादिरसवालेमें न वर्तनेवाली नहीं है, किन्तु वर्तनेवालीही है; याते जातिघटित लक्षणकी वहां प्रसक्ति नहीं है, शंका - 'जलका शुक्लही रूप है,' यह कैसे निश्चय किया जावे ? क्योंकि यमुनाके जलमें नीलरूप भी दिखाई देता है, समाधान-नीलरूपनिष्ठ जन्यता निरूपिता जो जनकता तादृश जनकताकी अवच्छेदक जो पृथिवीत्वजाति उसका जलमें अभाव होनेसे जलमें नील रूपका सम्भव नहीं हो सकता, यमुनाके जलमें नीलरूपकी प्रतीति तो पृथ्वीसम्बधसे औपाधिकी है अर्थात् नीचेकी पृथ्वी नीली है उसीकी नीलता जलमें दीख पड़ती है, इसीसे यमुनाके जलको यदि ऊपरको फैंके तो श्वेत प्रतीत होता है.

अथ जले माधुर्यें किं मानं, नहि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते, नच नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यम् । तस्याश्रयोपाधिकत्वात् । अन्यथा जम्बीरजलादावम्लादिरसोपलब्धेरम्लादिमत्त्वमपि स्यादिति चेत्, न । हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात् । नच हरीतक्यामेव जलोष्णसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यम् । कल्पनागौरवात् ।

शंका-जलक मीठेपनेमें क्या प्रमाण है ? रासनज प्रत्यक्षसे तो जलमें किसी रसकी भी प्रतीति नहीं होती यदि कहो कि नारियल तथा इक्षु आदिका जल मधुर ही होता है, तो युक्त नहीं; क्योंकि वह मधुरता पृथ्वी सम्बन्धसे पृथ्वीकीही है जलकी नहीं. (अन्यथा) निम्बु गरगलादिके रसमें अम्ल (खट्टा) रसभी प्रतीत होता है वहभी जलमें मानना चाहिये. समाधान--जलमें अनुद्बुद्ध मधुर रस है,हरीतकी(हरड) या आमला खानेके पश्चात् जल पीनेसे उसमें मधुरता उद्बुद्ध होती है. शंका-जल तथा ऊष्मा (मुखकी भाफ) के सम्बन्धसे हरीतकीमेंही रसान्तरकी उत्पत्ति मान लीजाय तो क्या दोष है? समाधान-कल्पनागौरव है, अर्थात् फलादिरूप पृथ्वीमें रसकी उत्पत्ति तेजःसंयोगसे देखी जाती है और यदि पूर्वोक्त हरीतकीके उदाहरणके अनुरोधसे जलके संयोगकोभी पृथिवीरसका उत्पादक माना जाय तो यह एक जुदा कार्य्यकारणभाव माननेमें कल्पनागौरव है.

पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जलेनाम्लादिकम्। जम्बीररसादौ त्वाश्रयोपाधिकी तथा प्रतीतिः। एवं जन्यशातिस्पर्शजनकतावच्छेदकं जन्यजलत्वम्, तदवच्छिन्नजनकतावच्छेदकं तु जलत्वमिति बोध्यम्। घृष्टचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्तिशीततरसलिलस्यैव। तेजःसंयोगाज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव, तत्र पाकासम्भवात्।

भाषा--अम्लादिनिष्ठ जन्यतानिरूपित जनकतावच्छेदकत्व पृथ्वीत्वको है; याते अम्लादिक जलके धर्म नहीं हैं, निम्बु गरगलादिके रसमें अम्लप्रतीति तो स्वसमवायिसंयोग सम्बन्धसे है याते औपाधिकी है. ऐसे जन्यशीतस्पर्शनिष्ठ जन्यतानिरूपित जनकताकी अवच्छेदक जन्य जलमें जलत्वजाति है और जन्यजलनिष्ठ जन्यतानिरूपित जनकताकी अवच्छेदक शुद्ध जलत्व जाति है. शंका--घिसेहुये चन्दनकाभी तो शीत स्पर्श होताहै याते जलका लक्षण चन्दनमें अतिप्रसक्त होगा. समाधान--चन्दनमें शीतलता प्रतीति चन्दनान्तर्गत जलकीही है, चन्दन शीतल नहीं है, अग्नि आदिके संयोगसे जलमें उष्णताकी प्रतीति तो औपाधिकी स्पष्टही है, जलमें पाक तो होही नहीं सकता.

स्नेहस्तत्र--

भाषा--स्नेह अर्थात् चिकनापना जलमेंही रहता है.

स्नेहस्तत्रेति। घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहो जलस्य स्नेहसमवायिकारणत्वात्। तेन जल एव स्नेह इति मन्तव्यम्।

भाषा--घृतादिकोंमेंभी स्नेह घृतान्तर्वर्ती जलकाही है, क्योंकि स्नेहकी समवायिकारणता जलमेंही सिद्ध है इससे जलमेंही स्नेहका मानना उचित है.

द्रवत्वं तु सांसिद्धिकमुदाहृतम्॥ ३९॥

भाषा--द्रवणगुण जलमें स्वाभाविक स्वीकार किया है॥ ३९॥

द्रवत्वमिति सांसिद्धकद्रवत्वं जातिविशेषः प्रत्यक्षसिद्धस्तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः। तैलादावपि जलस्येव द्रवत्वम्, स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति३९॥

भाषा--स्वाभाविक द्रवणमें स्वाभाविक द्रवत्वरूपा जातिविशेष तो प्रत्यक्षही सिद्ध है. स्वाभाविक द्रवत्वावच्छिन्न जन्यतानिरूपित जनकताकी अवच्छेदकभी

वही स्वाभाविक द्रवत्वरूपा जाति है. तैलादिकोंमेंभी द्रवणगुण जलकाहीहै स्नेहगुण-की अधिकतासे दहनानुकूलता तैलमें है, इस वार्ताको ग्रंथकार आगे कहेगा॥३९॥

नित्यतादि प्रथमवत्-

भाषा-जलमें नित्य अनित्यादि यावत् व्यवहार प्रथमवत् करने चाहिये.

प्रथमवदिति । पृथिव्या इवेत्यर्थः । तथाहि । जलं द्विविधं नित्य-मनित्यं च । परमाणुरूपं नित्यम्, द्व्यणुकादिकं सर्वमनित्यमवयव-समवेतं च । अनित्यमपि त्रिविधं शरीरेन्द्रियविषयभेदात् ।

भाषा-अर्थात् पृथ्वीवत् जलभी नित्य अनित्य भेदसे दो प्रकारका है, जो नित्य है वह परमाणुरूप है, शेष द्व्यणुकादिरूप संपूर्ण अनित्य है तथा अवयवोंमें समवायसंबन्धसे रहता है, शरीरभेदसे तथा इंद्रिय भेदसे तथा विषयभेदसे अनि-त्यभी तीन प्रकारका है.

पृथिवीतो यो विशेषस्तमाह, किंत्विति-

भाषा-'किन्तु' इत्यादि ग्रंथसे पृथ्वीसे जो विशेष है वह कहता है-

-किंतु देहमयोनिजम् ।

भाषा-पृथ्वीसे जलमें इतना भेद है कि जलका शरीर योनिसे पैदा नहीं होता.

अयोनिजमिति । अयोनिजमेवेत्यर्थः । जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्धम् ।

भाषा-जलसे उत्पन्न होनेवाला शरीर योनिसे पैदा नहीं होता यह वार्ता वरुण लोकमें प्रसिद्ध है.

इन्द्रियं रसनं-

भाषा-जलसे उत्पन्न होनेवाला इंद्रिय रसना है.

इन्द्रियमिति । रसनं जलीयमित्यर्थः । तथाहि रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् । सक्तुरसाभिव्यञ्जको-दकवत् । रसनसन्निकर्षे व्यभिचारणाय द्रव्यत्वं देयम् ।

भाषा-यह कल्पना अनुमानसे करी जाती है. तथाहि गंधादिकोंका न उद्बोधक होकर केवल रसकाही उद्बोधक होनेसे रसना इंद्रिय जलीय प्रतीत होताहै. दृष्टान्त-में जैसे जल सक्तुओं (सत्तुओं) के गन्धादिका न उद्बोधक होकर केवल रसकाही उद्बोधक है, गंधादिकोंका न उद्बोधक होकर केवल रसका उद्बोधक रसना वस्तुका

संयोगभी है, उसमें पूर्वोक्त हेतुका व्यभिचार है, उसके वारणार्थ हेतुमें "द्रव्यत्वे सति" यह विशेषण देना उचित है, अर्थात् द्रव्यत्वे सति गन्धादिकोंका न उद्बोधक होकर केवल रसका उद्बोधक होनेसे रसना इन्द्रिय जलीय है.

विषयं दर्शयति, सिन्धुरिति--

भाषा-'सिन्धु' इत्यादि ग्रन्थसे विषयको दिखलाता है—

-सिन्धुहिमादिर्विषयो मतः ॥ ४० ॥

भाषा-समुद्र, तुषार (बर्फ), आदि पदसे नदी, सरोवर, करका (गड़ा), ये सम्पूर्ण जलीय विषय हैं ॥ ४० ॥

सिन्धुः समुद्रः। हिमं तुषारः। आदिपदात् सरित्कासारकरकादिः सर्वो ग्राह्यः।

नच हिमकरकयोः कठिनत्वात्पार्थिवत्वमिति वाच्यम्। ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात्। यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः। अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकादीनां काठिन्यप्रत्ययस्य भ्रान्तित्वात्[१] ॥४०

शंका-हिमकरकादि कठिन स्पर्शवाले होनेसे पार्थिव प्रतीत होते हैं, समाधान-तेजःसंयोगसे विलीन (गले) हुये हिमकरकादि जलरूपसे साक्षात् प्रतीत होते हैं, जो (जलरूप) द्रव्य जिस (हिमकरकादि) रूप द्रव्यके ध्वंससे उत्पन्न हो वह (जल रूप) द्रव्य उस (हिमकरकादिरूप) द्रव्यका उपादानरूपेण (उपादेय) ग्रहण होता है, इस व्याप्तिसे हिमकरकादि जलसे अतिरिक्त पदार्थ नहीं है हिमकरकादिमें द्रवणका प्रतिरोध जीवोंके हानिलाभकारक अदृष्टविशेषसे है, तथा कठिनस्पर्शकी प्रतीति भ्रांतिसिद्ध है ॥ ४० ॥

तेजो निरूपयति, स्पर्श उष्ण इत्यादिना-

भाषा-'स्पर्श उष्ण' इत्यादि ग्रन्थसे मूलकार तेजका निरूपण करता है-

स्पर्श उष्णस्तेजसस्तु-

भाषा-जिसका स्पर्श उष्ण हो वह तेजःपदार्थ है।

उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः। इत्थं च जन्यो-

---

१ भ्रान्तित्वं नामातात्त्विकान्यथाभावेन वस्त्ववगाहनत्वम्।

ष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः। तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसन्धेयम्। न चोष्ण-स्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यम्। तत्राप्युष्णस्य सत्त्वात्। किन्तु तदन्तःपातिजलस्पर्शेनाभिभवादग्रहः। एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः।

भाषा—उष्णस्पर्शमें रहनेवाला (उष्णत्व) धर्म स्पर्शनिष्ठ जातिविशेष प्रत्यक्ष सिद्ध है, इस रीतिसे जन्य उष्णस्पर्शनिष्ठ कार्यतानिरूपिता जो तेजोनिष्ठा समवा-यिकारणता तादृश कारणताकी अवच्छेदक तेजस्त्व जाति विशेष है, उस तेजस्त्व जाति विशेषकी परमाणुओंमें सिद्धि पूर्वोक्त जलत्वजातिकी तरह जाननी चाहिये अर्थात् तेजःपरमाणुओंमें जन्य उष्णस्पर्श नहीं है, इसलिये जन्य स्पर्शनिष्ठ जन्यता-निरूपित जनकताकी अवच्छेदक परमाणु साधारण तेजस्त्व जाति सिद्ध नहीं होसकती; किन्तु जन्यस्पर्शनिष्ठ जन्यतानिरूपित जनकतावच्छेदकत्व रूपसे जन्यते-जस्त्वजातिकी सिद्धि और जन्यतेजस्त्वावच्छिन्न जन्यतानिरूपित जनकतावच्छेदकत्व रूपसे शुद्ध तेजस्त्व जातिकी सिद्धि होती है, शंका—उष्णस्पर्शवत्ता चन्द्रकिरणा-दिकोंमें अव्याप्तिग्रस्त है समाधान—चन्द्रकिरणादिमें उष्णस्पर्श है तो सही परन्तु चन्द्रकिरणोंके बीच जल भी रहता है, जलके स्पर्श दबा रहता है इसलिये ग्रहण नहीं होता, ऐसे ही रत्नभी तेजःपदार्थ है, उनका उष्णस्पर्श पार्थिवस्पर्शसे तिरस्कृत है और नेत्रादिमें अनुद्भूत (अनुद्बुद्ध) स्पर्श है इसलिये प्रत्यक्ष नहीं होता।

—स्याद्रूपं शुक्लभास्वरम्।

भाषा—तेजःपदार्थका रूप श्वेत तथा प्रकाशवान् है।

रूपमित्यादि। वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभ-वाच्छुक्लत्वाग्रहः। तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेत् न। अन्यदीयरूपेणापि धर्मिणो ग्रहसम्भवात्, शङ्खस्येव पित्तपीतिम्ना। वह्नेस्तु शुक्लरूपं नाभिभूतं किंतु तदीयं शुक्ल-त्वमभिभूतमित्यन्ये।

भाषा—प्रज्वलित अग्निमें तथा मणिकिरणादिमें जो रक्त (लाल) रूप दिखाई देता है वह पृथिवीका है, पार्थिवरूपसे तेजका वास्तवश्वेतरूप तिरस्कृत है; याते प्रत्यक्ष नहीं होता, शंका—यदि तेजका वास्तवरूप ग्रहण नहीं होता तो

उस रूपके धर्मी अग्नि आदिका भी ग्रहण न हुआ चाहिये. समाधान-धर्मीका ग्रहण रूपान्तरसे भी हो सकता है, जैसे पित्तदोषदूषित नेत्रोंद्वारा श्वेतशंखका पीत-रूपसे पार्थिवरूपसे अग्निका रूप तिरस्कृत (दबा हुआ) नहीं है, किन्तु अग्निके शुक्लरूपमें जो 'शुक्लत्व' जाति वह दबी है ऐसाभी कई लोग मानते हैं.

नैमित्तिकं द्रवत्वं तु-

भाषा-निमित्तसे अर्थात् अग्निसंयोगसे द्रवण तेजःपदार्थमें है.

नैमित्तिकमिति। सुवर्णादिरूपे तेजसि तत्सत्त्वात्। न च नैमित्तिक-द्रवत्वं न लक्षणं दहनादावव्याप्तेर्घृतादावतिव्याप्तेश्चेति वाच्यम्। पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिजातिमत्त्वस्य विवक्षितत्वात्।

भाषा-सुवर्णादिरूप तेजःपदार्थमें नैमित्तिक द्रवण प्रसिद्ध है. शंका-नैमित्तिक द्रवण तेजःपदार्थका लक्षण नहीं हो सकता; क्योंकि वह अग्निआदिकोंमें अव्याप्त है तथा घृतादिकोंमें अतिव्याप्त है. समाधान-पृथिवीमें न वर्तनेवाली जो नैमि-त्तिक द्रवणवालेमें वर्तनेवाली तेजस्त्वजाति तादृश जातिमत्ता यावत् तेजःपदार्थमें दिखलानेकी वक्ताकी इच्छा है; याते दोष नहीं ॥ ४१ ॥

नित्यतादि च पूर्ववत् ॥ ४१ ॥

पूर्ववदिति। जलस्येवेत्यर्थः।

भाषा-तेजःपदार्थका नित्यानित्य व्यवहार जलवत् जानना चाहिये ॥ ४१ ॥

तथाहि। तद् द्विविधं नित्यमनित्यं च। नित्यं परमाणुरूपं त-दन्यदनित्यं अवयवि च। तच्च त्रिधा शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजमेव, तच्च सूर्यलोकादौ प्रसिद्धम् ॥ ४१ ॥

भाषा-वह यह है कि तेज दोप्रकारका है एक नित्य है, दूसरा अनित्य है. नित्य परमाणुरूप है, उससे भिन्न अनित्य है तथा अवयवजन्य है. वह अनित्य शरीरभेदसे तथा इंद्रियभेदसे और विषयभेदसे पुनः तीन प्रकारका है. तैजसश-रीर अयोनिज सूर्यलोकमें प्रसिद्ध है ॥ ४१ ॥

अत्र यो विशेषस्तमाह इन्द्रियमिति-

भाषा-'इंद्रिय' इत्यादिग्रन्थसे तेजःपदार्थमें जो औरोंसे विशेषता है वह कहता है-

इन्द्रियं नयनं-

भाषा-नेत्र इन्द्रिय तेजःपदार्थसे उत्पन्न हुआ है.

चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात्प्रदीपवत् प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादाद्यं परकीयेति। घटादेः स्वीयरूपव्यञ्जकत्वात् व्यभिचारवारणाय द्वितीयं परकीयेति। अथवा प्रभाया दृष्टान्तत्वसम्भवादाद्यं परकीयेति न देयम्। चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्।

भाषा-घटपदार्थादिकोंके स्पर्शादिका न ग्राहक होकर केवल उन (घटादि) के रूपका ग्राहक होनेसे नेत्रइन्द्रिय तैजस प्रतीत होता है, जैसे प्रदीप घटादिके स्पर्शादिका ग्राहक न होकर केवल रूपका ग्राहक है और तैजस भी है, दृष्टान्तमें प्रदीपको स्वस्पर्शका ग्राहक होनेसे हेतुकी विशेषणासिद्धि वारणके लिये प्रथम 'परकीय' पद है. परकीय स्पर्शादिकोंके ग्राहक न होकर विषयतासम्बन्धसे स्वकीयरूप ग्राहकत्व घटादिपदार्थोंमें भी है; उनमें पूर्वोक्त हेतुका व्यभिचार होगा. उस (व्यभिचार) के वारणार्थ हेतुमें दूसरे 'परकीय' पदका निवेश है, अथवा 'प्रदीप' की जगह 'प्रभा' को दृष्टान्त रक्खे तो प्रथम 'परकिय' पदके न देनेसे भी दोष नहीं, प्रभामें स्वपरस्पर्शादि ग्राहकत्व नहीं है, नेत्र घटादिके संयोगमें पूर्वोक्त हेतुका व्यभिचार होगा इसलिये हेतुमें 'द्रव्यत्व' पदका निवेश करना चाहिये अर्थात् " द्रवत्वे सति स्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् " इति।

विषयं दर्शयति, वह्नीति-

भाषा-'वह्नि' इत्यादि मूलसे ग्रन्थकार तैजसविषयको दिखलाताहै-

—वह्निस्वर्णादिर्विषयो मतः।

भाषा-अग्नि तथा सुवर्णादि धातु यह तैजस विषय है.

ननु सुवर्णस्य तैजसत्वे किं मानमिति चेत्, न। सुवर्णं तैजसम् असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानजन्यद्रवत्वात्, यन्नैवं तन्नैवं यथा पृथिवीति। न चाप्रयोजकं पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चाग्निसंयोगनाश्यत्वात्। ननु पीतिमगुरुत्वाश्रयस्य पार्थिवभागस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेत्, न। जलमध्यस्थमसीक्षोदकवत्तस्याद्रवत्वात्।

शंका–सुवर्णके तैजस होनेमें क्या प्रमाण है? समाधान–किसी प्रतिबन्धकके न होनेसेभी अत्यन्त अग्निका संयोग होनेसेभी सुवर्णमें अनुच्छिद्यमान द्रवण रहताहै इसलिये जाना जाता है कि सुवर्ण तैजस है, (यन्नैवं) जो प्रतिबन्धकके न होनेसे अत्यन्त अग्निके संयोग होनेसे अनुच्छिद्यमान द्रवणवाला नहीं है अर्थात् जिसके द्रवणका उच्छेद (विनाश) होजाता है, (तन्नैवं) वह तैजसभी नहीं है;जैसे पृथ्वी है। शंका–तुम्हारा अनुमान अप्रयोजक है अर्थात् अनुकूल तर्कके अभाववाला है, याते सुवर्णके तैजस न होनेसेभी पूर्वोक्त हेतु सुवर्णमें रहे तो दोष नहीं. समाधान–घृतलाक्षादि पृथ्वीमें जो द्रवण है तथा जन्य जलमें द्रवण है वह अग्निसंयोगसे नष्ट हो जाता है. सुवर्णके द्रवणका नाश नहीं होता. यही पूर्वोक्त अनुमानमें अनुकूलतर्क है, शंका–पीतरूपके तथा गुरुत्वके आश्रय पृथ्वीके भागोंकाभी तो उस कालमें सुवर्णके साथही द्रवण होता है. उनमें पूर्वोक्त हेतुका व्यभिचार होगा. समाधान–जलके बीच घुले हुये स्याहीके चूर्णकी तरह सुवर्णमें होनेवाले पृथ्वीके पीत भागभी द्रवणयुक्त नहीं केवल जलके तथा सुवर्णके सम्बंधसे उभयत्र पार्थिव भागोंमें द्रवणकी भ्रमात्मक प्रतीति होती है.

अपरे तु पीतिमाश्रयस्यात्यन्ताग्निसंयोगेऽपि रूपापरावृत्तिदर्शनात्तत्प्रतिबन्धकं विजातीयं द्रवद्रव्यं कल्प्यते । तथाहि । अग्निसंयोगे पीतिमगुरुत्वाश्रयो विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः, अत्यंताग्निसंयोगेऽपि पूर्वरूपविजातीयरूपानधिकरणपार्थिवत्वात् । जलमध्यस्थपीतपटवत्, तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात् ।

भाषा–कई एक आचार्य ऐसेभी कहते हैं कि, पीतरूपके आश्रय पार्थिवभागाका अति अग्निके संयोग होनेसेभी रूप बदलता नहीं देखाजाता इसलिये अग्निसंयोगसे पार्थिवभागोंमें रूप न बदलने देनेवाला कोई विजातीय विलक्षण तथा द्रवणयुक्त द्रव्यप्रातिबंधक कल्पना करना उचितहै उस कल्पनाका प्रकार यह है कि,जैसे जलपूरित पात्रमें पीत वस्त्र डालकर अग्निपर वह पात्र रखा जाय तो अत्यन्त अग्निका संयोग होनेसेभी वस्त्रका पूर्वरूपसे विलक्षण रूप नहीं देखाजाता;वैसेही पीतरूपयुक्त तथा गुरुत्वके आश्रय सुवर्णस्थ पार्थिवभागोंमेंभी अत्यन्त अग्निसंयोग होनेसेभी पूर्वरूपसे विलक्षणरूपकी अधिकरणता प्रतीत नहीं होती. इससे जाना जाताहै कि वह सुवर्णस्थ पार्थिवभाग किसी विलक्षण तथा रूपके प्रतिबंधक द्रवणयुक्त द्रव्यके साथ मिश्रित है; वह विलक्षण द्रव्य पृथ्वी जलसे भिन्न होनेसे नियमसे तेजःपदार्थ है.

वायुं निरूपयति, अपाकज इति ।

भाषा—'अपाकज' इत्यादिग्रंथसे मूलकार वायुका निरूपण करता है—

अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ॥४२ ॥
तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ।

भाषा—अग्निसंयोगसे न उत्पन्न होनेवाला जो शीत उष्णसे भिन्न मध्यराशीका स्पर्श उसवाला वायु है ॥ ४२ ॥ यह वायु टेढ़ी गतिवाला है. स्पर्शादिक हेतुओंसे वायुका आनुमानिक ज्ञान होता है ।

अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तमपाकज इति । अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीतेति । तेन वायवीयो विजातीयः स्पर्शो दर्शितः । तज्जनकतावच्छेदकं वायुत्वमिति भावः ।

भाषा—अनुष्णाशीतस्पर्शयुक्त पृथ्वीभी है; उससे वायुके लक्षणकी अव्याप्ति वारणार्थ लक्षणमें 'अपाकज' पद अनुष्णाशीतस्पर्शका विशेषण किया है. अपाकजस्पर्श जल तथा अग्निमें है; उनसे अतिव्याप्तिवारणार्थ लक्षणमें 'अनुष्णाशीत' पदका प्रवेश है. इतने कथनसे वायुमें अग्नि जल पृथ्वीसे विलक्षण स्पर्श दिखलाया है. उस विलक्षणस्पर्शनिष्ठजन्यतानिरूपित जनकता वायुमें है. जनकताका अवच्छेदक वायुत्व जाति है.

एष वायुः स्पर्शादिलिङ्गकः वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते, विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पनेन च वायोरनुमानात् । यथा च वायोर्न प्रत्यक्षं तथाऽग्रे वक्ष्यते ।

भाषा—इस वायुका स्पर्शादि(लिंग)हेतुओंसे आनुमानिक ज्ञान होताहै. इसके अनुमापक स्पर्श,शब्द धारण और कम्पन ये चार हेतु हैं. अर्थात् विलक्षणस्पर्शसे विलक्षण शब्दसे तृणादि गुरुपदार्थोंके धारणसे वृक्षादिकोंके कंपनसे वायुका आनुमानिक ज्ञान होताहै. अनुमान रचनाका प्रकार यह है कि—जो यह रूपवाले द्रव्यमें समवाय सम्बन्धसे न रहनेवाला स्पर्श है वह किसीके आश्रित है. पृथ्वी समवेतस्पर्शकी तरह स्पर्श होनेसे। इति१। एवं रूपवाले द्रव्यका अभिघात न होनेसेभी जो यह पुष्पपत्रादि

कोंमें शब्द सन्तति है; वह किसी स्पर्शवाले तथा वेगवाले द्रव्यके संयोगसे जन्य है. दण्डाभिघातसे भेरीशब्दकी तरह अवयवोंके न विभाग होनेसेभी द्रव्यसम्बन्धि शब्द सन्तति होनेसे–इति २; एवं आकाशमें तृणतुलादिकोंकी धृति किसी स्पर्शवाले तथा वेगवाले द्रव्यके संयोगहेतुका है, नौका धृतिकी तरह अस्मदादिकोंसे अनधिष्ठित द्रव्यधृति होनेसे–इति ३; एवं रूपवाले द्रव्यके अभिघातसे विना जो तृणशाखादिमें क्रिया है वह किसी स्पर्शवाले तथा वेगवाले द्रव्यके अभिघातसे जन्य है. नदीप्रवाहमें प्रवहित तृणक्रियाकी तरह विलक्षण क्रिया होनेसे–इति ४; जिस रीतिसे वायुका प्रत्यक्ष नहीं होना वह रीति आगे आत्मनिरूपणमें कहेगा.

पूर्ववन्नित्यताद्युक्तं--

भाषा–वायुका नित्य अनित्यपना जलकी तरहही कहा है।

पूर्ववदिति। वायुर्द्विविधः, नित्योऽनित्यश्च, परमाणुरूपो नित्यस्तदन्योऽनित्यः समवेतश्च, सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात्। तत्र शरीरमयोनिजं पिशाचादीनाम्, परंतु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगसाधनत्वं जलादीनां प्राधान्याज्जलीयत्वादिकमिति।

भाषा–अर्थात् वायु नित्यानित्यभेदसे दो प्रकारका है. परमाणुरूप वायु नित्य है और कार्य्यरूप अनित्य है. तथा समवायसम्बन्धसे स्वअवयवोंमें रहता है. वह अनित्यवायुभी शरीरभेदसे, इन्द्रियभेदसे तथा विषयभेदसे तीन प्रकारका है. उनमेंसे वायवीय शरीर तो अयोनिज पिशाचादिकोंका वायुलोकमें प्रसिद्ध है; परन्तु इतना विशेष है कि जलीय शरीरोंको तथा तैजस शरीरोंको तथा वायवीय शरीरोंको भोग उपकरणता पार्थिवभागोंकी मिलावटसे है. जलीयत्व आदि व्यवहार तो जलादिकोंका प्रधानता होनेसे होता है।

अत्र यो विशेषस्तमाह, देहव्यापीति–

भाषा–'देहव्यापि' इत्यादि ग्रन्थसे मूलकार त्वगिंद्रियनिष्ठ विशेषताको कहता है–

–देहव्यापि त्वगिन्द्रियम् ॥ ४३ ॥

भाषा–सर्वशरीरमें व्यापक त्वगिन्द्रिय वायवीय है ॥ ४३ ॥

शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक्। तच्च वायवीयं रूपादिषु स्पर्शस्यैव व्यञ्जकत्वादङ्गसङ्गिसलिलशैत्यव्यञ्जकव्यजनवातवत्।

भाषा—यावत् शरीरमें व्यापक तथा स्पर्शका ग्राहक त्वक्इन्द्रिय है. वह रूपादिकोंके मध्यमेंसे स्पर्शहीका ग्राहक होनेसे वायवीय है, जैसे व्यजन (पंखे) का पवन शरीरसम्बन्धि स्वेदरूप जलके केवल शैत्यहीका ग्राहक है तद्वत् ॥ ४३ ॥

विषयं दर्शयति, प्राणादिरिति

भाषा—'प्राणादि' इत्यादि ग्रन्थसे मूलकार वायवीय विषयको दिखलाता है—

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः ।

भाषा—प्राणादिवायुसे लेकर महावायुपर्यंत वायवीय विषय है ।

यद्यप्यनित्यो वायुश्चतुर्विधस्तस्य चतुर्थी विधा तु प्राणादिरित्युक्तमाकरे । तथापि संक्षेपादत्र त्रैविध्यमुक्तम् । प्राणस्त्वेक एव हृदादिनानास्थानवशान्मुखनिर्गमादिनानाक्रियावशाच्च नानासंज्ञां लभत इति ।

भाषा— यद्यपि अनित्य वायु चार प्रकारका है. उसका चौथा भेद प्राणादिवायु है, यह वार्ता प्रशस्तपादभाष्यमें लिखी है, तथापि इस ग्रन्थमें संक्षेपसे अनित्य वायुके तीन भेदही कहे हैं. प्राणवायु एकभी हृदयादि नानास्थानभेदसे तथा मुखनिर्गमनादि नानाक्रियाके भेदसे 'प्राण अपान आदि' नाना संज्ञाको लाभ करता है ।

आकाशं निरूपयति, आकाशस्येति—

भाषा—'आकाशस्य' इत्यादि ग्रन्थसे मूलकार आकाशका निरूपण करे है—

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥४४॥

भाषा—शब्दात्मक विशेष गुणवाला आकाश जानना योग्य है ॥ ४४ ॥

आकाशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकं न जातिः किंत्वाकाशत्वं शब्दाश्रयत्वम् । वैशेषिक इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय । एतेन प्रमाणमपि दर्शितम् ।

भाषा—आकाश काल तथा दिशाको एकं एक व्यक्ति होनेसे आकाशत्वादिधर्म जातिरूप नहीं है, किंतु समवायसम्बन्धसे शब्दका आश्रयही आकाश है. मूलकारिकामें 'वैशेषिक' यह कथन तो विशेष गुणान्तर व्यवच्छेदके वास्ते है, अर्थात् आकाशमें शब्दके सिवाय विशेष गुणान्तर नहीं है; इतने कथनसे आकाशमें प्रमाणभी दिखलाया है, वह प्रमाण अनुमान है ।

तथाहि । शब्दो विशेषगुणश्चक्षुर्ग्रहणायोग्यवहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवत्, शब्दो द्रव्यसमवेतो गुणत्वात् संयोगवत् इत्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे, शब्दो न स्पर्शवद्विशेषगुणोऽग्निसंयोगासमवायिकारणकत्वाभावे सत्यकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् । पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम् । पटरूपादौ व्यभिचारवारणायाकारणगुणपूर्वकेति । जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति ।

भाषा–उसका प्रकार यह है कि शब्द भी स्पर्शकी तरह गुण है, नेत्रसे ग्रहणके, अयोग्य होकर बाह्य इन्द्रियसे ग्रहण योग्य शब्दत्व जातिवाला होनेसे–इति अनुमानसे शब्दको गुण न माननेवाले वैयाकरण तथा मीमांसाके मतका खण्डन किया और अग्रिम अनुमानमें स्वरूपासिद्धिका परिहारभी किया है, दूसरा अनुमान यह है कि शब्द संयोगकी तरह गुण होनेसे किसी एक द्रव्यमें समवायसम्बन्धसे रहता है, इस अनुमानसे 'शब्द' को द्रव्यसमवेतत्वासिद्धिके पश्चात् ' शब्द ' स्पर्शवाले द्रव्योंका विशेष गुण नहीं है, सुखकी तरह अग्निसंयोगरूप असमवायिकारणत्व अभावविशिष्ट अकारणगुणपूर्वक प्रत्यक्ष होनेसे; इस अनुमानसे यह सिद्ध हुआ कि 'शब्द' पृथ्वी आदि चतुष्टयका विशेष गुण नहीं है, पृथ्वीनिष्ठ पाकजरूपका प्रत्यक्ष अकारण गुणपूर्वक है उससे प्रकृत हेतुका व्यभिचार वारणार्थ " अग्निसंयोगासमवायिकारणकत्वाभावे सति " यह सप्तमी अन्त हेतुका विशेषण कहा. पार्थिवरूपका असमवायिकारण अग्निसंयोग है, याते व्यभिचारी नहीं है, एवं यदि सप्तमी अन्तमात्र हेतु रक्खें तो पटादिके रूपमें हेतु व्यभिचारी होगा, क्योंकि पटके रूपमें अग्निसंयोगासमवायिकारणकत्वाभाव सिद्ध है, इसलिये 'अकारण गुणपूर्वक प्रत्यक्षत्व' कहा. पटके रूपका प्रत्यक्ष अकारण गुणपूर्वक नहीं है; किन्तु पटका कारणीभूत जो तन्तु उनके रूपग्रहणपूर्वक पटके रूपका प्रत्यक्ष है, याते व्यभिचार नहीं है, एवं यदि हेतुमें 'प्रत्यक्ष' पद नहीं देवे तो समग्र हेतुका व्यभिचार जलीय परमाणुओंके रूपमें होगा; क्योंकि जलीय परमाणुभी अग्निसंयोगासमवायिकारणकत्वाभावविशिष्ट अकारणगुणपूर्वक है; परन्तु प्रत्यक्ष नहीं है याते व्यभिचार नहीं है–इति ॥

शब्दो न दिक्कालमनोगुणो विशेषगुणत्वात् । नात्मविशेषगुणो

---

१ जो लौकिक सम्बन्धसे इन्द्रियग्राह्य हो और लौकिक सम्बन्धहीसे द्विइन्द्रियसे ग्रहणकी योग्यता न रखताहो तथा गुणत्वव्याप्य जातिवाला हो वह 'विशेऽगुण' कहाता है. इस लक्षणके लक्ष जो विशेषगुण हैं उनका निरूपण 'बुद्ध्यादिषट्कं' इत्यादि ग्रन्थसे मूलकार स्वयं करेगा।

बहिरिन्द्रियग्राह्यत्वाद्रूपवत्। इत्थं च शब्दाधिकरणं नवमद्रव्यं गगननामकं सिद्ध्यतीति। न च वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम्। अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात्॥ ४४॥

भाषा-तत्पश्चात् 'शब्द' दिशाका तथा कालका तथा मनकाभी गुण नहीं है रूपकी तरह विशेष गुण होनेसे-इति ऐसा अनुमान करना उचित है, एवं शब्द आत्माका विशेष गुण भी नहीं है, रूपकी तरह बाह्य इन्द्रियसे ग्रहणकी योग्यतावाला होनेसे इति. इसरीतिसे शब्दका अधिकरण नवम द्रव्य 'गगन' नामक सिद्ध होता है, शंका-यदि ऐसा मानले कि वायुके अवयवोंमें प्रथम सूक्ष्मशब्द उत्पन्न होता है, पश्चात् क्रमसे स्थूलवायुमें कारण गुणपूर्वक स्थूल शब्द उत्पन्न होता है तो क्या दोष है? समाधान-पृथ्वी आदि चतुष्टयमें जो गुण रहता है वह सभी अपने आश्रयके नाश होनेसे नाश होता है और शब्द अयावत् द्रव्यभावी है अर्थात् शब्दके आश्रय द्रव्यके नाशसे जन्य जो नाश उस नाशका प्रतियोगी शब्द नहीं है; याते शब्दवायुका विशेष गुणभी नहीं है॥ ४४॥

तत्र शरीरस्य विषयस्य चाभावादिन्द्रियं दर्शयति, इन्द्रियमिति-

भाषा-आकाशीय शरीर तथा विषयका अभाव होनेसे 'इन्द्रिय' इत्यादि ग्रन्थसे मूलकार इन्द्रियको दिखलाता है।

इन्द्रियं तु भवेच्छ्रोत्रं-

भाषा-श्रवण इन्द्रिय आकाशसे उद्बुद्ध हुआ है.

नन्वकाशं लाघवादेकं सिद्धम्, श्रोत्रं तु पुरुषभेदेन भिन्नं तत्कथमाकाशं स्यादत आह, एकः सन्नपीत्यादि-

शंका-आकाश लाघवसे एक सिद्ध है और श्रोत्र पुरुषभेदसे भिन्न २ है वह कैसे आकाश हो सकता है? समाधान-'एक इत्यादि' ग्रन्थसे मूलकार समाधान लिखता है-

-एकः सन्नप्युपाधितः।

भाषा-आकाश एक भी उपाधि भेदसे भिन्न २ है.

आकाश एक एव सन्नप्युपाधेः कर्णशष्कुल्यादेर्भेदाद्भिन्नं श्रोत्रात्मकं भवतीत्यर्थः।

भाषा–एकही आकाश (कर्णशष्कुली) श्रोत्रछिद्ररूप उपाधिके भेदसे भिन्न२ श्रोत्रात्मक होता है–इति ।

कालं निरूपयति, जन्यानामिति–

भाषा–'जन्यानां' इत्यादि ग्रन्थसे मूलकार कालका निरूपण करे हैं:

जन्यानां जनकः कालः–

भाषा–जन्य पदार्थोंका (जनक) साधारण निमित्त कारण काल है.

तत्र प्रमाणं दर्शयितुमाह, जगतामिति–

भाषा–जगतां 'इत्यादि' ग्रंथसे मूलकार कालमें प्रमाण दिखलाता है–

–जगतामाश्रयो मतः ॥ ४५ ॥

भाषा–वह काल सर्व जगत्का आधार है ॥ ४५ ॥

तथाहि। इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पन्दादिकं विषयीकरोति तदा सूर्यपरिस्पंदादिना घटादेः सम्बन्धो वाच्यः । स च संयोगादिर्न सम्भवतीति काल एव तत्सम्बन्धघटकः कल्प्यते । इत्थं च तस्याश्रयत्वमपि सम्यक् ॥ ४५ ॥

भाषा–उसका प्रकार यह है कि "इदानीं घटः–अर्थात् इसकालमें घटहै" इत्याकारक (प्रतीति) ज्ञान यदि सूर्य्यकी क्रियाको विषय करता है तो सूर्य्यके क्रियाके साथ घटादिकोंका कोई संबंध कहना चाहिये; वह संबंध संयोगसमवाय तो नहीं है. किन्तु 'स्वाश्रयतपनसंयोगि' रूपसंबंध है. 'स्व' पदसे सूर्य्यकी क्रियाका ग्रहण है, उसका आश्रय-सूर्य्य है, उसका संयोगि काल है, उसका संयोग घटादिके साथ है. इत्याकारक संबंधका घटका मध्यपातिरचक कालही कल्पना किया जाता है. इस रीतिसे उक्त पदार्थोंसे भिन्न काल सिद्ध हुआ तो उसको पूर्वोक्त जगत्का आधार भी कहना उचित है ॥ ४५ ॥

प्रमाणान्तरं दर्शयति, परापरत्वेति–

भाषा–'परापरत्व' इत्यादि ग्रन्थसे मूलकार कालमें प्रमाणान्तर दिखलाता है,

परापरत्वधीहेतुः–

भाषा– परत्व तथा अपरत्व बुद्धिका हेतुभी कालही है.

परत्वापरत्वबुद्धेरसाधारणं निमित्तं काल एव । परत्वापरत्वयो-

रसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः कल्प्यत इति भावः ।

शंका–ज्येष्ठभ्रातामें 'परत्व' ज्ञान होता है, तथा कनिष्ठ भ्रातामें 'अपरत्व' ज्ञान होता है. ऐसे परत्व अपरत्वके ज्ञानका असाधारण निमित्त कारण केवल 'काल' है. कालिक परत्व अपरत्वका असमवायिकारण जो काल पिण्डका संयोग उसका (अनुयोगिता संबन्धसे) आश्रय लाघवसे एक पृथक् काल कल्पना हो सकता है.

नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आह, क्षणादिरिति–

शंका–कालके एकसिद्ध होनेसेभी क्षण दिवस मास वर्ष तथा युग इत्यादि भेदरूप व्यवहार नहीं होसकेगा.

–क्षणादिः स्यादुपाधितः ।

समाधान–कालमें क्षणादिव्यवहार उपाधि प्रयुक्त है.

भाषा-(नव्यास्तु) और चिन्तामणिकारादि नवीनलोग तो यह कहते हैं कि-चित्रावयवीस्थलमें अनेकप्रकारका रूप अव्याप्यवृत्तित्वेन रूपेणही उत्पन्न होता है; ऐसे स्थलमें नीलरूपादिकोंमें पीतरूपादिके प्रति प्रतिबन्धकता कल्पना करनीभी महागौरव है चित्ररूप कोई पृथक् वर्ण नहीं है, इसीसे "लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः॥ श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते" इत्यादि स्कन्दपुराणका वचनभी उपपन्न होसकता है अर्थात् इस वचनमें नील (वृष) बलद [उत्]सर्जनके उद्देशसे अनेक वर्णयुक्त वृषको नीलवृष कहा है, यदि

चित्रवर्ण आचार्यको पृथक् स्वीकृत होता तो "चित्रं वृषं विसर्जयेत्" इतना मात्रही कहता.

न च व्याप्याव्याप्यवृत्तिजातीययोर्द्वयोर्विरोधः,मानाभावात् ।

शंका-व्याप्यवृत्ति स्वभाववाले पदार्थोंको अव्याप्यवृत्ति माननाभी उचित नहीं क्योंकि व्याप्यवृत्तित्वरूप धर्मका तथा अव्याप्यवृत्तित्वरूप धर्मका परस्पर तेजस्तिमिरवत् विरोध है समाधान-रूपादि जो व्याप्यवृत्तित्वेन उत्पन्न होते हैं वे अव्याप्यवृत्तित्वेन उत्पन्न नहीं होसकते; इस विरोधमें कोई प्रमाण नहीं है.

न च लाघवादेकं रूपम् । अनुभवविरोधात् । अन्यथा घटादेरपि लाघवादैक्यं स्यादिति । एतेन स्पर्शादिकं व्याख्यातमिति वदन्ति ॥ १०० ॥

शंका-लाघवसे चित्ररूप एकही मान लिया जाय तो हानि क्या है ? समा० एक माननेमें "अयं नीलादिनानावर्णयुक्तोऽवयवी" इत्यादि अनुभवसे विरोध होता है (अन्यथा) यदि अनुभवसे विरुद्धभी लाघव स्वीकृत होयतो घटपटादि व्यक्तिभी संसारमात्रमें लाघवसे एक मानलेनी चाहिये. (एतेन) इसी कथनसे चित्रस्पर्शादिका निरासभी समझलेना; (इति वदन्ति) यह सब नवीन लोगोंका कथन है ॥१००॥

जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकम् ॥

भाषा-वह रूप जलादि परमाणुओंमें नित्य है और पार्थिवपदार्थमात्रमें जन्यहै.

जलादीति । जलपरमाणौ तेजःपरमाणौ च रूपं नित्यम् । पृथिवीपरमाणुरूपं तु न नित्यं पाकेन रूपान्तरोत्पत्तेः । नहि घटस्य पाकानन्तरं तदवयवोऽपक्व उपपद्यते, न हि रक्तकपालस्य कपालिका नीलावयवा भवति । एवं क्रमेण परमाणावपि पाकसिद्धेः।अन्यजलतेजःपरमाणुरूपाभिन्नं रूपम् । सहेतुकं जन्यम् ।

भाषा-अर्थात् जलीय परमाणुओंमें तथा तैजस परमाणुओंमें रूप नित्य है और पार्थिव परमाणुओंमें रूप अनित्य है क्योंकि वहां (पाकेन) अग्निसंयोगसे रूपान्तरकी उत्पत्ति होतीहै. अग्निसंयोगद्वारा घटके परिपाक होनेसे उसके अवयव परिपक्व नहीं होते, यह कहना उचित नहीं; क्योंकि अग्निसंयोगसे रक्तहुए (कपाल) घटार्धभागका (कपालिका) छोटा हिस्सा नीलपीतादि अवयवोंवाला देखनेमें नहीं आता. इसक्रमसे विचारनेसे पार्थिव परमाणुओंमेंभी पाककी सिद्धि होसकती है

(अन्यत्) जल तथा तेजके परमाणुओंके रूपसे भिन्न जो रूप है वह सभी सहेतुक अग्निसंयोगादि कारणसे उत्पन्न होता है.

रसं निरूपयति, रसस्त्विति—

भाषा—' रसस्तु ' इत्यादि ग्रन्थसे मूलकार रसका निरूपण करते हैं—

रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ॥ १०१ ॥
सहकारी रसज्ञाया नित्यतादि च पूर्ववत् ॥

भाषा—रसनाइन्द्रियसे ग्रहण होनेवालेका नाम 'रस' है वह रस मधुर, लवण, कटु ,कषाय, अम्ल तथा तिक्त भेदसे षट् प्रकारका है ॥१०१॥ और रसनाइन्द्रियका सहायक है,नित्यता तथा अनित्यता इसकी रूपकी तरहही जान लेनी चाहिये.

सहकारीति । रासनज्ञाने रसः कारणमित्यर्थः । पूर्ववदिति जलपरमाणौ रसो नित्योऽन्यः सर्वोऽपि रसोऽनित्य इत्यर्थः ।

भाषा—अर्थात् रासन साक्षात्कारके प्रति विषयतासम्बन्धसे रसको कारणताहै पूर्ववत् अर्थात् रूपकी तरह रसभी जलीय परमाणुओंमें नित्य है तथा पार्थिव पदार्थ मात्रमें अनित्य है.

गन्धं निरूपयति, घ्राणग्राह्य इति—

भाषा—' घ्राणग्राह्यो' इत्यादि ग्रन्थसे मूलकार गन्धका निरूपण करते हैं.

घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः ॥ १०२ ॥

भाषा—केवल घ्राणइन्द्रिय ग्रहणके योग्यका नाम 'गन्ध' है वह गन्ध घ्राण इन्द्रियका ही उपकारक है ॥ १०२ ॥

उपकारको घ्राणजन्यज्ञाने कारणमित्यर्थः । गन्धः सर्वोऽनित्य एव ॥ १०२ ॥

भाषा—(उपकारक) अर्थात् घ्राणज साक्षात्कारके प्रति विषयतासम्बन्धेन उभयविध गन्धको कारणता है. एवं सभी गन्ध अनित्यही हैं रूपादिकी तरह नित्य कोई भी नहीं ॥ १०२ ॥

सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः ।

भाषा—एवं सौरभ तथा असौरभभेदसे वह गन्ध दोप्रकारका है.

स्पर्शं निरूपयति, स्पर्श इति—

भाषा—'स्पर्शः ' इत्यादि ग्रन्थसे मूलकार स्पर्शका निरूपण करते हैं—

स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः १०३॥

भाषा-केवल त्वग् इन्द्रियसे ग्रहणके योग्यका नाम ' स्पर्श ' है वह स्पर्श त्वग् इन्द्रियका उपकारक है ॥ १०३ ॥

उपकारक इति । स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः ॥१०३॥

भाषा-स्पार्शनप्रत्यक्षमें विषयतासम्बन्धेन स्पर्शको कारणता है ॥ १०३ ॥

अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः ॥
काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत्॥१०४॥

भाषा-वह स्पर्श शीत उष्ण तथा अनुष्णाशीतभेदसे तीन प्रकारकाहै. वह स्पर्श काठिन्यादि धर्मवाला केवल पृथिवीमेंही रहताहै और इस स्पर्शकी नित्यता तथा अनित्यता (पूर्ववत्) रूपादिकी तरहही जानने योग्य है ॥ १०४ ॥

अनुष्णाशीत इति । पृथिव्या वायोश्च स्पर्शोऽनुष्णाशीतः, जलस्य शीतः, तेजस उष्णः । काठिन्येति । कठिनसुकुमारस्पर्शौ पृथिव्या एवेत्यर्थः।कठिनत्वादिकं तु न संयोगनिष्ठो जातिविशेषः, चक्षुर्ग्राह्यतापत्तेः । पूर्ववदिति । जलतेजोवायुपरमाणुस्पर्शा नित्यास्तद्भिन्नस्पर्शास्त्वनित्या इत्यर्थः ॥ १०४ ॥

भाषा-(अनुष्णाशीत इति) पृथिवीका तथा वायुका स्पर्श अनुष्णाशीत है अर्थात् न उष्ण है. न शीत है;और जलका स्पर्श शीत है. अग्नि आदि तेजःपदार्थका स्पर्श उष्ण है. एवं कठिन कोमलादि स्पर्शभी पृथिवीमें रहता है. कठिनत्वादि धर्मसंयोगनिष्ठ जातिविशेष नहीं हैं क्योंकि यदि संयोगनिष्ठ जातिविशेष होय तो उसका संयोगकी तरह चाक्षुषप्रत्यक्षभी हुआ चाहिये; इसलिये ' काठिनत्व ' आदि पृथिवीगत स्पर्शकेही व्याप्यवृत्ति धर्म हैं. (पूर्ववदिति) जल तेज तथा वायुके परमाणुओंका स्पर्श नित्य हैं इनसे भिन्न पार्थिवपरमाणुओंका स्पर्श अनित्यहै १०४

एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित् ॥

भाषा-ये रूपरसादि चारों केवल पृथिवीमेंही तेजःसंयोगसे उत्पन्न तथा परिवर्तन होते हैं अन्यत्र जलादिकोंमें नहीं होते.

एतेषां रूपरसगन्धस्पर्शानाम् । नान्यत्रेति । पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पाकसंयोगादुपलभ्यते, न हि शतधापि

ध्मायमाने जलादौ रूपादिकं परावर्तते । नीरे सौरभमौष्ण्यं चान्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत् ।

भाषा-इन रूप रस गन्ध स्पर्शोंकी अग्निसंयोगसे उत्पत्ति केवल पृथिवीमेंही है और कहीं नहीं, (नान्यत्रेति) पृथिवीके रूप रस गंध तथा स्पर्शका परिवर्तन अग्निसंयोगसे हुआ प्रतीत होता है और जलको सैकड़ोंबार तपानेसेभी उसके रूपका परिवर्तन प्रतीत नहीं होता. एवं जैसे जलके सम्बंधसे वायुमें तथा पृथिवीमें शीत स्पर्शका भान होता है वस्तुतः इनमें शीतस्पर्श नहीं है. वैसेही जलमें सौरभका तथा उष्णताका भानभी पृथिवीतेजःसंसर्गरूप उपाधिके वशसेही विज्ञ पुरुषोंने अन्वयव्यतिरेकद्वारा निर्णय किया है; वस्तुतः जलमें सौरभ तथा उष्णता नहीं है.

तत्रापि परमाणौ स्यात्पाको वैशेषिके नये ॥ १०५॥

भाषा-उस पृथिवीमेंभी वैशेषिकके सिद्धान्तसे पाक परमाणुओंमें होता है अर्थात् तेजःसंयोगसे प्रत्येक परमाणुमें रूपादिचतुष्टयका परिवर्तन होता है ॥ १०५॥

तत्रापि पृथिवीष्वपि परमाणावेव पाक इति वैशेषिका वदन्ति । तेषामयमाशयः । अवयविनाऽवष्टब्धेष्ववयवेषु पाको न सम्भवति, परंतु वह्निसंयोगेनावयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः, पुनश्च पक्वपरमाणुसंयोगाद्द्व्यणुकादिक्रमेण पुनर्महावयविपर्यन्तमुत्पत्तिः, तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्चेति ।

भाषा-(तत्रापि उस अनेक विध पृथिवीमेंभी परमाणुओंहीमें (पाक) अग्निसंयोगसे रूपादिका परिवर्तन होता है, यह (वैशेषिक) कणादमुनिके अनुयायी लोग कहते हैं. उनके हृदयका भाव यह है कि-घटादि अवयवीविषै (अवष्टब्ध) निरोधित हुए छोटे कपालकादि अवयवोंमें पाक नहीं होसकता; परन्तु प्रबल अग्निसंयोगसे अवयवीके विनाशके अनन्तर प्रत्येक अवयवके स्वतंत्र परमाणुओंमें पाक होता है. फिर परिपक्व परमाणुओंके परस्परसंयोगसे द्व्यणुक त्र्यणुकादि क्रमेण फिर घटादि महाअवयवी पर्यन्त उत्पत्ति होती है. तेजःपदार्थके अत्यन्त वेगवशसे शीघ्रही पूर्व (व्यूह) संघातका नाश तथा संघातांतरकी उत्पत्ति होती है-इति.

अत्र द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्भवतीति शिष्यबुद्धिवैशद्याय क्षणप्रक्रिया। तत्र विभागजविभागानङ्गीकारे नवक्षणा।

भाषा-यहां 'द्व्यणुकादि विनाशसे लेकर फिर उत्पन्न हुआ अवयवी कितने क्षणोंके पश्चात् रूपरसादिवाला होता है? इस वार्ताका शिष्यलोगोंकी बुद्धिके विशदकरणार्थ निरूपण करते हुए ग्रन्थकार क्षणिक प्रक्रियाको दिखलाते हैं. इस प्रकरणमें यदि विभागज विभागको ना अङ्गीकार करे अर्थात् (कारण) कपालादि तथा (अकारण) आकाशादिके विभागसे जैसे (कार्य) घटादि तथा (अकार्य) आकाशादिका विभाग स्वीकृत है, वैसे (कारण) कपालद्वयादि मात्रके विभागसे (कारण) कपालादि तथा (अकारण) आकाशादिके विभागको न मानें तो नवक्षणमें अवयवी विनष्ट होयकर फिर रूपादिवाला होजाता है.

विभागजविभागाङ्गीकारे तु विभागः किञ्चित्सापेक्षो विभागं जनयेत्, निरपेक्षस्य तत्त्वे कर्मत्वं स्यात्। संयोगविभागयोरनपेक्षं कारणं कर्मेति हि वैशेषिकसूत्रम्। स्वोत्तरोत्पन्नभावान्तरानपेक्षत्वं च तस्यार्थः। अन्यथा कर्मणोऽप्युत्तरसंयोगजनने पूर्वसंयोगनाशापेक्षणादव्याप्तिः स्यादिति।

भाषा-एवं विभागज विभागका अङ्गीकार करें तो विभागभी (किञ्चित्) स्वसमवायिनिष्ठ क्रियाकी (सापेक्षा) सहकारतासे विभागान्तरको उत्पन्न करैगा, क्योंकि पदार्थान्तरकी सहकारतासे विना विभागका जनक तो केवल कर्मही है यदि विभागभी निरपेक्ष होकर विभागान्तरका जनक होगा तो कर्मके लक्षणकी उसमें अतिव्याप्ति होगी; क्योंकि संयोगका तथा विभागका जो निरपेक्ष कारण होय वह कर्म होता है. यह वार्ता वैशेषिक शास्त्रके १७ वें सूत्रमें लिखी है अर्थात् (स्व) कर्म, संयोग तथा विभागको उत्पन्न करता हुआ अपनेसे उत्तरकालमें उत्पन्न होनेवाले भावान्तरकी अपेक्षा नहीं करता. यह उक्त सूत्रका भावार्थ है (अन्यथा) यदि ऐसा अर्थ नहीं करें तो कर्मकोभी उत्तरसंयोगके उत्पन्न करनेमें पूर्वसंयोग नाशकी अपेक्षाही है, निरपेक्ष कारण नहीं है. एवं उक्त सूत्रलक्षणकी पूर्वयोगसे नाशकी अपेक्षा करनेवाली कर्मव्यक्तिमें अव्याप्ति होगी.

तत्र यदि द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्तदा दशक्षणा। अथ द्रव्यनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात् तदैकादशक्षणा।

भाषा-(तत्र) इस प्रकरणमें (द्व्यणुकादि) द्रव्यारम्भक संयोगका जो विनाश तादृश विनाशविशिष्ट कालकी अपेक्षासे यदि विभागज विभागका विचार किया जाय तो दशक्षणमें अवयवी फिर रूपादिमान् होसकता है और यदि द्रव्यनाश-विशिष्ट कालकी अपेक्षाको लेकर विभागज विभागका विचार किया जाय तो एकादश क्षणमें अवयवी फिर रूपादिवाला होसकता है ।

तथाहि । अथ नवक्षणा-वह्निसंयोगात्परमाणौ कर्म , ततः पर-माण्वन्तरेण विभागः, तत आरम्भकसंयोगनाशः । ततो द्व्य-णुकनाशः १। ततः परमाणौ श्यामादिनाशः २ । ततो रक्ता-द्युत्पत्तिः ३ । ततो द्रव्यारम्भानुगुणाक्रिया ४ । ततो विभागः ५ । ततः पूर्वसंयोगनाशः ६ । तत आरम्भकसंयोगः ७ । ततो द्व्यणुकोत्पत्तिः ८ । ततो रक्ताद्युत्पत्तिः ९ ।

भाषा-(तथाहि) इसी वार्ताको नवक्षणादिःप्रक्रियाके क्रमसे लिखते हैं—पहले अग्निसंयोगसे द्व्यणुकारम्भक परमाणुद्वयमेंसे एक परमाणुमें क्रिया होती है उस क्रियासे पीछे द्व्यणुकारम्भक परमाणुअन्तरके साथ उस क्रियायुक्त परमाणुका विभाग होता है. उसके पीछे द्व्यणुकारम्भक संयोगका नाश होता है. उसके पीछे द्व्यणुकका नाश होता है १ । प्रथमक्षणकी गणनाभी यहांहीसे करनी उचित है; क्योंकि पीछे ग्रन्थकारने "द्व्यणुकादिनाशमारभ्य" इत्यादि कथनसे यही प्रतिज्ञा करी है. उसके पीछे परमाणुगत श्यामादि गुणोंका नाश होता है २ । उसके पीछे तीसरे क्षणमें परमाणुओंमें रक्तादि गुणोंकी उत्पत्ति होती है ३ । उसके पीछे चौथे क्षणमें द्व्यणुकरूप द्रव्यकी उत्पादिका क्रिया होती है ४ । उसके पीछे पञ्चमक्षणमें उस क्रियासे विभाग होता है ५ । उसके पीछे छठे क्षणमें विश्लिष्टपरमाणुओंके पूर्वसंयोगका नाश होता है ६ । उसके पीछे सातवें क्षणमें द्व्यणुकारम्भकसंयोग होता है ७ । उसके पीछे आठवें क्षणमें फिर द्व्यणुककी उत्पत्ति होती है । उसके पीछे नवम क्षणमें रक्तादिगुणोंकी उत्पत्ति होती है ९ । इति ।

ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यार-म्भानुगुणाक्रियाऽस्त्विति चेत् । न । अग्निसंयुक्ते परमाणौ यत्कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च तत्र परमाणौ क्रियान्त-राभावात्, कर्मवति कर्मान्तरानुत्पत्तेः । निर्गुणे द्रव्ये द्रव्या-रम्भानुगुणाक्रियानुपपत्तेश्च ।

शंका-श्यामादि गुणोंके नाशक्षणमें या रक्तादि गुणोंकी उत्पत्तिक्षणमें परमाणुओंमें द्व्यणुकादि द्रव्यकी उत्पादिका क्रिया मान लीजाय तो हानि क्या है? समाधान-अग्निसंयुक्त परमाणुओंमें जो द्व्यणुकादिका विनाशक प्रथम कर्म है उसके विनाशसे विना और परमाणुओंमें रक्तादि गुणोंकी उत्पत्तिसे विना उनही परमाणुओंमें द्व्यणुकादि द्रव्यारम्भकी. दूसरी क्रिया नहीं होसकती प्रथमक्रिया स्वसत्त्वावस्थामें दूसरी क्रियाकी उत्पत्तिमें प्रतिबन्धक होती है; इसलिये क्रियावालेमें क्रियान्तर नहीं होसकती और निर्गुण द्रव्यमें द्रव्यारम्भणानुकूल क्रियाका होनाही असम्भव है।

तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेत्। न। पूर्वरूपादिध्वंसस्यापि रूपान्तरे हेतुत्वात्॥

॥ इति नवक्षणा ॥

शंका-तथापि परमाणुओंमें श्यामादि गुणोंकी निवृत्तिक्षणमेंही रक्तादि गुणोंकी उत्पत्तिभी मानलीजाय तो एक क्षणका लाघव है. समाधान-यह कथनभी सयुक्तिक नहीं है, क्योंकि पूर्वरूपादि ध्वंसको रूपान्तरादिकी उत्पत्तिमें कारणता है और कार्यकारणका समकालमें होना असंभव है। इति नवक्षणा ॥

अथ दशक्षणा-सा चारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजनने सति स्यात्।

अथ दशक्षणा-वह दशक्षणप्रक्रिया द्रव्यारंभसंयोगविनाशविशिष्ट कालकी अपेक्षासे विभागजविभागका अङ्गीकार करनेसे प्रतीत होती है अर्थात् द्व्यणुकादि द्रव्यारंभक संयोगके विनाशकालहीमें यदि परमाणुद्वयके विभागसे परमाणु तथा आकाशादिका विभागभी मानलिया जाय तो दशक्षणमें पुनः द्रव्यरूपादिमान् होता है.

तथाहि। वह्निसंयोगाद्द्व्यणुकारम्भके परमाणौ क्रिया। ततो विभागः, तत आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशविभागजविभागौ १। ततः श्यामनाशपूर्वसंयोगनाशौ २। ततो रक्तोत्पत्त्युत्तरसंयोगौ ३। ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः ४। ततोऽदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुगुणक्रिया ५। ततो विभागः ६। ततः पूर्वसंयोगनाशः ७। तत आरम्भकसंयोगः ८। ततो द्व्यणुकोत्पत्तिः ९। ततो रक्ताद्युत्पत्तिः १० ॥ इति दशक्षणा ॥

भाषा-(तथाहि) प्रथम अग्निसंयोगसे द्व्यणुकारम्भक परमाणुमें क्रिया होतीहै उस क्रियासे पीछे परमाणुद्वयका विभाग होता है. उस विभागसे पीछे द्व्यणुकादि द्रव्यके आरम्भक संयोगका नाश होताहै उसके पीछे द्व्यणुकरूप द्रव्यका नाश तथा परमाणु आकाशका विभाग ये दोनों एकही क्षणमें होते हैं १ । उससे पीछे द्वितीय क्षणमें परमाणुगत श्यामादिरूपका नाश तथा परमाणु आकाशके प्रथम संयोगका नाश ये दोनों एकही क्षणमें होते हैं २ ।उससे पीछे तृतीयक्षणमें परमाणुगत रक्तादिकी उत्पत्ति तथा परमाणुआकाशका उत्तरसंयोग ये दोनों एकही क्षणमें होतेहैं ३ ।उससे पीछे चतुर्थक्षणमें अग्निनोदनसे उत्पन्न हुई परमाणुगत क्रियाका नाश होताहै ४। उससे पीछे पंचमक्षणमें अदृष्टवाले आत्माके संयोगसे अर्थात् वह परिपक्व द्रव्य जिस जीवात्माके भोगार्थ बनाहै उसके सम्बन्धसे द्रव्यारम्भणानुकूल क्रिया होती है ५। उससे पीछे छठे क्षणमें उस क्रियासे परमाण्वाकाशादिका विभाग होता है ६ । उस विभागसे पीछे सातवें क्षणमें विभक्त अवयवोंके पूर्वसंयोगका नाश होताहै ७। उससे पीछे अष्टमक्षणमें द्रव्यारम्भक संयोग होताहै ८ । उससे पीछे नवम क्षणमें द्व्यणुकादि द्रव्यकी उत्पत्ति होती है ९।उससे पीछे दशमक्षणमें रक्तादि गुणोंकी उत्पत्ति होतीहै १० । इति ।

अथैकादशक्षणा-वह्निसंयोगात्परमाणौ कर्म । ततो विभागः, ततो द्रव्यारम्भकसंयोगनाशः, ततो द्व्यणुकनाशः १ । ततो द्व्यणुकनाशविशिष्टं कालमपेक्ष्य विभागजविभागश्यामनाशौ २ । ततः पूर्वसंयोगनाशरक्तोत्पत्ती ३ । तत उत्तरसंयोगः ४ । ततो वह्निनोदनजन्यपरमाणुकर्मनाशः५। ततोऽदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुगुणक्रिया६ । ततो विभागः७। ततः पूर्वसंयोगनाशः ८ । ततो द्रव्यारम्भकसंयोगः ९ । ततो द्व्यणुकोत्पत्तिः १० । ततो रक्ताद्युत्पत्तिः ११ । इति ॥

अथ एकादशक्षणप्रक्रिया-अग्निसंयोगसे परमाणुओंमें क्रिया होती है उस क्रियासे एक परमाणुका दूसरेसे विभाग होताहै उस विभागसे द्रव्यके आरम्भकसंयोका नाश होता है उससे पीछे द्व्यणुकरूप कार्यद्रव्यका विनाश होता है १ । उससे पीछे द्व्यणुकरूप द्रव्यनाशाधिकरणकालकी अपेक्षासे दूसरे क्षणमें परमाणुद्वयविभागसे परमाण्वाकाशका विभाग तथा परमाणुगत श्यामादिरूपका नाश होताहै २ । उससे पीछे तीसरे क्षणमें प्रथम जहां परमाणुओंका संयोग था उसका नाश, तथा

रक्तादि गुणोंकी उत्पत्ति होती है ३। उससे पीछे चौथे क्षणमें क्रियाकी विश्रान्तिका कारक परमाणुओंका उत्तर संयोग होताहै ४। उससे पीछे पञ्चमक्षणमें अग्निके नोदनसे उत्पन्न हुए परमाणुगत कर्मका नाश होताहै ५। उससे पीछे छठे क्षणमें अदृष्टवाले जीवात्माके संयोगसे द्व्यणुकादि द्रव्यके आरम्भणानुकूला क्रिया होती है ६। उस क्रियासे पीछे सातवें क्षणमें फिर विभाग होता है ७। उसके पीछे अष्टमक्षणमें प्रथम हुए संयोगका नाश होता है ८। उससे पीछे नवमक्षणमें द्व्यणुकादि द्रव्यारम्भक संयोग होता है ९। उससे पीछे दशमक्षणमें द्व्यणुकादि द्रव्यकी उत्पत्ति होती है १०। उससे एकादशक्षणमें फिर द्रव्यमें रक्तादिगुणोंकी उत्पत्ति होतीहै ११। इति।

मध्यमशब्दवदेकस्मादग्निसंयोगान्न रूपनाशरक्तोत्पादौ, तावत्कालमेकस्याग्नेरस्थिरत्वात्। किंच यद्युत्पादको नाशकस्तदा नष्टे रूपादावग्निनाशे नीरूपश्चिरं परमाणुः स्यात्। नाशकश्चेदुत्पादकस्तदा रक्तोत्पत्तौ तदग्निनाशे रक्ततरता न स्यात्॥

भाषा-मध्यमशब्दकी तरह एकही अग्निसंयोग श्यामादि गुणोंका नाशक तथा रक्तादि गुणोंका उत्पादक नहीं होसकता अर्थात् आदि अन्तके शब्दद्वयको छोडकर मध्यवर्ति यावत् शब्दोंको जैसे स्वपूर्वशब्दनाशके प्रति तथा स्वउत्तर शब्द उत्पत्तिके प्रति कारणता है वैसे द्व्यणुकादि द्रव्यके विनाशक एकही अग्निसंयोगसे श्यामादि गुणोंका विनाश तथा रक्तादिकी उत्पत्ति नहीं होसकती, क्योंकि (तावत्कालम्) श्यामनाशोत्पत्तिके अव्यवहित पूर्वक्षणपर्यन्त वह द्व्यणुकादि द्रव्यका विनाशक एक अग्निसंयोगस्थायी नहीं रहता, (किञ्च) इसमें औरभी युक्ति है कि-यदि रक्तादि उत्पादक अग्निसंयोगकोही श्यामादिविनाशकभी मानें तो श्यामादिरूपके नष्ट होनेसे दैवात् यदि अग्निसंयोगकाभी नाश होय तो पीछे चिरकालपर्यन्त परमाण्वादि द्रव्य रूपरहितही पडा रहना चाहिये; परन्तु यह वार्ता किसी विद्वान्के अनुभवसम्मत नहीं ऐसेही यदि श्यामादि गुणोंके विनाशक अग्निसंयोगकोही रक्तादिका उत्पादिक भी मानें तो साधारण रक्तकी उत्पत्तिके अनन्तर यदि दैवात् अग्निसंयोगका नाशहोय तो रक्ततरता नहीं हुई चाहिये परन्तु साधारण रक्त हुये पीछे अग्निसंयोगका नाश होनेसेभी रक्ततर स्वयं होजाताहै यह वार्ता अनुभवसिद्धहै इसलिये श्यामादिके विनाशक तथा रक्तादिके अग्निसंयोग भिन्न २ हैं; यही मानना उचित है।

अथ पञ्चक्षणा-एवं परमाण्वन्तरे कर्मचिन्तनात् पञ्चमादि क्षणेऽपि गुणोत्पत्तिः।

अथ पञ्चक्षणा-एवं यदि परमाणु अन्तरमें कर्मका चिन्तन करें अर्थात् द्व्यणुककी विनाशक क्रियावाले परमाणुसे भिन्न जो द्व्यणुकान्तरका आरम्भक परमाणु उस परमाणुमें यदि कर्मका चिन्तन करें अर्थात् द्व्यणुकारम्भक संयोगके विनाशादि उत्पत्तिक्षणमें यदि द्व्यणुकान्तरारम्भक कर्मका चिन्तन करें तो पञ्चमादि क्षणोंमें भी रक्तादि गुणोंकी उत्पत्ति हो सकती है-

तथाहि । एकत्र परमाणौ कर्म, ततो विभागः, तत आरम्भकसंयोगनाशपरमाण्वन्तरकर्मणी । ततस्तु द्व्यणुकनाशः परमाण्वन्तरकर्मजश्च विभाग इत्येककालः १ । ततः श्यामादिनाशः, विभागाच्च पूर्वसंयोगनाश इत्येककालः २ । ततो रक्तोत्पत्तिः द्रव्यारम्भकसंयोगश्चेत्येककालः ३ । अथ द्व्यणुकोत्पत्तिः ४ । अथ रक्तोत्पत्तिः ५ ॥ इति पञ्चक्षणा ॥

भाषा-(तथाहि) अग्निसंयोगसे एक परमाणुमें क्रिया हुई उस क्रियासे एक परमाणुका दूसरेसे विभाग हुआ, उस विभागसे द्व्यणुकारम्भक संयोगका विनाश तथा परमाणुअन्तरमें कर्म हुआ उससे पीछे द्व्यणुकरूप द्रव्यका नाश तथा परमाणुअन्तरमें कर्मजन्य विभाग हुआ,इतना द्वितीयक्षणरूप एक काल जानना चाहिये१। उससे पीछे नष्ट द्रव्यके परमाणुओंमें श्यामादि गुणोंका विनाश तथा परमाणुअन्तर विभागसे पूर्वसंयोगका विनाश हुआ, इतना द्वितीयक्षणरूप एक काल जानना चाहिये २ । उससे पीछे नष्टद्रव्यके परमाणुओंमें रक्तादि गुणोंकी उत्पत्ति तथा द्व्यणुकादि द्रव्यका आरम्भक संयोग हुआ,इतना तृतीय क्षणरूप एककाल जानना चाहिये ३ । उसके पीछे द्व्यणुकादि द्रव्यकी उत्पत्ति हुई ४ । उससे पीछे रक्तादि गुणोंकी उत्पत्ति हुई ॥ ५ ॥ इति पञ्चक्षणाप्रक्रिया ॥

अथ षट्क्षणा--द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात्षष्ठे गुणोत्पत्तिः ।

अथ षट्क्षणा-एवं पूर्वोक्त रीतिसे यदि द्व्यणुकादि द्रव्य नाश समकालमें परमाणुअन्तरमें कर्मका चिन्तन करें तो छठे क्षणमें रक्तादिगुणोंकी उत्पत्ति होती है.

तथाहि । परमाणुकर्मणा परमाण्वन्तरविभागः, तत आरम्भकसंयोगनाशः । अथ द्व्यणुकनाशपरमाण्वन्तरकर्मणी १ । अथ श्यामनाशः परमाण्वन्तरकर्मजो विभागश्च २ । ततो रक्तोत्पत्तिः

परमाण्वन्तरे पूर्वसंयोगनाशश्च३। ततः परमाण्वन्तरसंयोगः ४। ततो द्व्यणुकोत्पत्तिः ५। अथ रक्तोत्पत्तिः ६॥ इति षट्क्षणा॥

भाषा-(तथाहि) अग्निसंयोगज परमाणुकी क्रियासे परमाणुअन्तरका विभाग होता है, उस विभागसे द्व्यणुकादि द्रव्यके आरम्भक संयोगका विनाश होता है, उससे पीछे द्व्यणुकका विनाश तथा परमाणुअन्तरमें क्रिया होती है १। उससे पीछे दूसरे क्षणमें नष्ट द्रव्यके परमाणुओंमें श्यामादि गुणोंका विनाश तथा परमाणु अन्तरमें होनेवाली क्रियासे उत्पन्न होनेवाला विभाग होता है २। उससे पीछे तीसरे क्षणमें नष्ट द्रव्यके परमाणुओंमें रक्तादिरूपकी उत्पत्ति होती है तथा परमाणु अन्तरमें पूर्वसंयोगका विनाश होता है ३। उससे पीछे चौथे क्षणमें रक्तहुए परमाणुका परमाणु अन्तरके साथ संयोग होता है ४। उससे पीछे पञ्चम क्षणमें द्व्यणुकादि द्रव्यकी उत्पत्ति होती है ५। छठे क्षणमें सम्पन्न द्व्यणुकादि द्रव्यमें रक्तादिरूपकी उत्पत्ति होती है ॥ ६ ॥ इति षट्क्षणा प्रक्रिया ॥

अथ सप्तक्षणा-एवं श्यामनाशक्षणे परमाण्वन्तरे कर्मचिन्तनात्सप्तक्षणा।

अथ सप्तक्षणा-एवं यदि श्यामादि गुणनाशक्षणमें पूर्वोक्त रीतिसे परमाणुअन्तरमें कर्मका चिन्तन करे तो सप्तक्षणमें पुनः द्रव्य रूपादिगुणोंवाला होता है.

तथाहि। परमाणौ कर्म, ततः परमाण्वन्तरेण विभागः,तत आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशः १। ततः श्यामादिनाशपरमाण्वन्तरकर्मणी २। ततो रक्तोत्पत्तिः परमाण्वन्तरे कर्मजविभागश्च ३। ततः परमाण्वन्तरेण पूर्वसंयोगनाशः ४। ततः परमाण्वन्तरेण संयोगः ५। ततो द्व्यणुकोत्पत्तिः ६। ततो रक्तोत्पत्तिः ७॥ इति सप्तक्षणा॥

भाषा-(तथाहि) अग्निसंयोगसे परमाणुमें क्रिया होती है; उस क्रियासे एक परमाणुका दूसरेसे विभाग होता है, उस विभागसे द्रव्यारंभक संयोगका विनाश होता है १। उससे पीछे द्व्यणुकादि द्रव्यका विनाश होता है १। उससे पीछे दूसरे क्षणमें नष्टद्रव्यके परमाणुओंमें श्यामादिगुणोंका विनाश तथा परमाणुअन्तरमें क्रिया होती है २। उससे पीछे तीसरे क्षणमें नष्ट द्रव्यके परमाणुओंमें रक्तादि गुणोंकी उत्पत्ति तथा परमाणुअन्तरमें क्रियाजन्य विभाग होताहै ३। उससे पीछे चौथे क्षणमें परमाणुअन्तरके साथ पूर्व संयोगका नाश

होताहै४।उससे पीछे पंचमक्षणमें रक्तपरमाणुका परमाणुअन्तरके साथ संयोग होता है५।उससे पीछे छठे क्षणमें द्व्यणुकादि द्रव्यकी उत्पत्ति होतीहै६ । उससे पीछे सातवें क्षणमें उस द्रव्यमें रक्तादि गुणोंकी उत्पत्ति होती है. ७ । इति सप्तक्षणा प्रक्रिया ॥

अथाष्टक्षणा—एवं रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिन्तनादष्टक्षणा ।

अथ अष्टक्षणा—एवं यदि रक्तादिगुणोंकी उत्पत्तिकालमें पूर्वोक्त रीतिसे परमाणु अन्तरमें कर्मका चिन्तन करें तो अष्टक्षणमें द्रव्य पुनः रूपादि गुणयुक्त होता है.

तथाहि । परमाणौ कर्म, ततः परमाण्वन्तरविभागः, तत आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशः १ । ततः श्यामनाशः २। ततो रक्तोत्पत्तिपरमाण्वन्तरकर्मणी ३ । ततः परमाण्वन्तरकर्मजविभागः ४ । ततः परमाण्वन्तरे पूर्वसंयोगनाशः ५ । ततः परमाण्वन्तरसंयोगः ६ । ततो द्व्यणुकोत्पत्तिः ७ । अथ रक्तोत्पत्तिः ८ । इत्यष्टक्षणा ॥ १०५ ॥

भाषा-(तथाहि) अग्निसंयोगसे परमाणुमें क्रिया हुई, उस क्रियासे परमाणुके परमाणुअन्तरसे विभाग हुआ. उस विभागसे द्रव्यारम्भक संयोगका विनाश हुआ. उससे पीछे द्व्यणुकादि द्रव्यका नाश हुआ १। उससे पीछे दूसरे क्षणमें नष्ट द्रव्यके परमाणुओंमें श्यामादि गुणोंका नाश हुआ २। उससे पीछे तीसरे क्षणमें नष्ट द्रव्यके परमाणुओंमें रक्तादि गुणोंकी उत्पत्ति तथा परमाणु अन्तरमें क्रिया होतीहै ३। उससे पीछे चौथे क्षणमें परमाणुअन्तरमें उत्पन्न हुए कर्मसे विभाग होता है ४ । उससे पीछे पंचमक्षणमें परमाणुअन्तरमें पूर्वसंयोगका विनाश होता है ५ । उससे पीछे छठे क्षणमें रक्तपरमाणुका परमाणुअन्तरके साथ संयोग होता है ६ । उससे पीछे सातवें क्षणमें द्व्यणुकादि द्रव्यकी उत्पत्ति होती है ७ । उससे पीछे अष्टमक्षणमें उस द्रव्यमें रक्तादि गुणोंकी उत्पत्ति होती है ॥ १०५ ॥ इति अष्टक्षणा प्रक्रिया ॥

नैयायिकानां तु नये द्व्यणुकादावपीष्यते ॥

भाषा—नैयायिकोंके मतमें तो द्व्यणुकादि कार्यद्रव्यमेंभी पाक होसकता है.

नैयायिकानामिति । नैयायिकानां मते द्व्यणुकादाववयविन्यपि पाको भवति । तेषामयमाशयः । अवयविनां सच्छिद्रत्वाद्वह्नेः सूक्ष्मावयवैरन्तः प्रविष्टैरवयवेष्ववष्टब्धेष्वपि पाको न विरुध्यते, वैशेषिकमतेऽनन्तावयवितन्नाशकल्पने गौरवात् ।

भाषा--गौतमादि नैयायिकोंके सिद्धान्तमें तो द्व्यणुकादि अवयवोंमेंभी अग्निसंयोगसे पाक होसकताहै परमाणुपर्यंत धावन करनेका कुछ प्रयोजनही नहीं.उनके हृदयका भाव यह है कि–घटादि अवयवी सदा छिद्रयुक्तही रहते हैं; उन छिद्रोंमें अग्निके सूक्ष्म अवयव प्रवेश कर जाते हैं; इसलिये परस्पर मिले मिलाये अवयवीरूप अवयवोंमेंभी पाक मान लेनेमें कुछ विरोध नहीं है. एवं वैशेषिकके मतमें, अनन्त अवयवी तथा उसका ध्वंस कल्पनेमें गौरवभी है.

इत्थं च ' सोऽयं घटः ' इत्यादिप्रत्यभिज्ञापि संगच्छते । यत्र तु न प्रत्यभिज्ञा तत्रावयविनाशोऽपि स्वीक्रियत इति ।

भाषा--इस रीतिसे जब अवयवीका विनाश अङ्गीकार न किया तो "सोऽयं घटः" इत्याकारक प्रत्याभिज्ञाज्ञानभी बन सकता है अर्थात् यदि अवयवी अग्निसंयोगसे विनष्ट होकर दूसरा उत्पन्न होय तो"सोऽयं घटः" यह प्रत्यभिज्ञाज्ञान नहीं हुआ चाहिये परन्तु होता तो है. इसलिये अग्निसंयोगसे अवयवीका विनाश मानना उचित नहीं परन्तु जहां 'सोऽयम्' इत्यादि प्रत्याभिज्ञात्मक बुद्धि नहीं होती वहां अवयवीका अग्निआदिसंयोगसे विनाशभी हमको स्वीकार है–इति ।

संख्यां निरूपयितुमाह, गणनेति–

भाषा–'गणना' इत्यादि ग्रन्थसे मूलकार संख्याका निरूपण करते हैं–

गणनाव्यवहारे तु हेतुः संख्याऽभिधीयते ॥ १०६ ॥

भाषा–गणनाव्यवहारमें हेतुभूत गुणका नाम संख्या है ॥ १०६ ॥

गणनाव्यवहारासाधारणकारणं संख्येत्यर्थः ॥ १०६ ॥

भाषा–अर्थात् परिगणनरूप व्यवहारका असाधारण कारणरूप संख्यात्मक गुण है ॥ १०६ ॥

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते ॥

भाषा–उसमें एकत्वरूप संख्या नित्यपदार्थोंमें नित्य है तथा अनित्यपदार्थोंमें अनित्य है.

नित्येष्विति । नित्येषु परमाण्वादिष्वेकत्वं नित्यम् । अनित्ये घटादावेकत्वमनित्यमित्यर्थः ।

भाषा–अर्थात् परमाणुआदि नित्यपदार्थोंमें एकत्व नित्य है तथा घटादि अनित्योंमें एकत्व अनित्य है.

द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः ॥१०७॥

भाषा–और द्वित्वादि संख्यासे लेकर परार्द्ध पर्यन्त यावत् संख्या अपेक्षाबुद्धिजन्य है ॥ १०७ ॥

द्वित्वादय इति । द्वित्वादयो व्यासज्यवृत्तिसंख्या अपेक्षाबुद्धिजन्याः ॥१०७ ॥

भाषा–अर्थात् (व्यासज्यवृत्ति) धर्मद्वय समनियतवृत्ति द्वित्वादि परार्द्धपर्यंत यावत् संख्या अपेक्षा बुद्धिसे उत्पन्न होती है. "एकं दशशतं चैव सहस्रमयुतं तथा ॥ लक्षं च नियुतं चैव कोटिरर्बुदमेव च ॥ वृन्दं खर्वो निखर्वश्च शंखः पद्मश्च सागरः ॥ अन्त्यं मध्यं परार्द्धं च दश वृद्ध्या यथाक्रमम् ॥ १ ॥" इस गणितविद्याके नियमानुसार यदि एक अंकके आगे "१०००००००००००००००००" ऐसे सत्रह शून्य लगादिये जावें तो उस संख्याका नाम परार्द्ध है. एवं द्वित्वादि संख्यासे लेकर एतादृश परार्द्धपर्यन्त यावत् संख्या अपेक्षाबुद्धिसे उत्पन्न होती है ॥ १०७ ॥

अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः ॥

भाषा–यह सब द्वित्वादि धर्म अनेक आश्रयोंमें पर्याप्तिसम्बन्धसे रहते हैं, यह पूर्वजविद्वान् लोगोंका अनुभवानुरोधेन कथन है।

अनेकेति । यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्तते, तथाऽप्येको द्वावितिप्रत्ययाभावादेको न द्वाविति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्याप्तिलक्षणः कश्चन सम्बन्धोऽनेकाश्रयोऽभ्युपगम्यते ।

भाषा–यद्यपि द्वित्वादिका समवाय भी प्रत्येक घटादिमें रहता है, इसलिये ऐसे स्थलमें पर्याप्तिसम्बन्धकी कल्पना करनी उचित नहीं तथापि "एको द्वौ" इत्याकारक प्रत्ययके न होनेसे तथा "एको न द्वौ" इत्याकारक प्रत्ययके होनेसे द्वित्वादिकोंका 'पर्याप्ति' नामक कोई एक सम्बन्ध अनेक द्रव्यरूप आश्रयोंमें रहनेवाला प्रतीत होता है. "अयमेको घटः, इमौ द्वौ" इत्याकारक प्रतीति सिद्ध स्वरूप सम्बन्धविशेषका नाम 'पर्याप्ति' है ।

अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥ १०८ ॥

भाषा–उस अपेक्षाबुद्धिके नाश होनेसे उन द्वित्वादि धर्मोंकाभी विनाश होता है ॥ १०८ ॥

अपेक्षाबुद्धिनाशादिति । प्रथममपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, ततो विशेषणज्ञानं द्वित्वत्वानिर्विकल्परूपं, ततो द्वित्वत्ववि-शिष्टप्रत्ययमपेक्षाबुद्धिनाशश्च, ततो द्वित्वनाश इति ।

भाषा-प्रथम क्षणमें " अयमेकः अयमेकः " इत्याकारक अपेक्षाबुद्धि उत्पन्न होती है. दूसरे क्षणमें उस अपेक्षाबुद्धिसे द्वित्वकी उत्पत्ति होती है. तीसरे क्षणमें द्वित्वके द्वित्वत्वरूप विशेषणका निर्विकल्पात्मक " इमे द्वित्वद्वित्वत्वे " इत्याकारक ज्ञान होता है. चौथे क्षणमें द्वित्वत्वविशिष्ट द्वित्वका लौकिक प्रत्यक्ष तथा अपेक्षाबुद्धिका विनाश होता है, पीछे पञ्चम क्षणमें द्वित्वादिका विनाश होता है ।

यद्यपि ज्ञानान्तरं द्विक्षणमात्रस्थायि, योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात् । तथाप्यपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं कल्प्यते, अन्यथा निर्विकल्पककालेऽपेक्षाबुद्धिनाशानन्तरं द्वित्वस्यैव नाशः स्यान्न तु द्वित्वप्रत्यक्षम्, तदानीं विषयाभावात्, विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात् । तस्माद्द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते ।

भाषा-यद्यपि और साधारण यावत् ज्ञान द्विक्षणमात्र स्थित रहते हैं, क्योंकि यह नियम है कि-प्रत्यक्षके योग्य विभुके विशेषगुण स्वउत्तरवर्ति विभु विशेषगुणसे नाश हुआ करते हैं तथापि अपेक्षाबुद्धिकी तीनक्षण स्थितिकी कल्पना करनी पड़ती है (अन्यथा) यदि तीन क्षण स्थितिकी कल्पना न करें अर्थात् और ज्ञानोंकी तरह द्विक्षणस्थायिही अपेक्षाबुद्धिभी मानें तो द्वित्वत्वनिर्विकल्परूप ज्ञानकालहीमें अपेक्षाबुद्धिके नाशके अनन्तर द्वित्वकाभी नाश होगा तो द्वित्वका साक्षात्कार नहीं होसकेगा; क्योंकि उस कालमें द्वित्वआत्मकविषय नहीं रहा है और चक्षुरादि इन्द्रियद्वारा विद्यमान विषयकाही ज्ञान होता है. यह वार्ता सभी विद्वानोंके संमत है. इसलिये द्वित्वादिका साक्षात्कारही अपेक्षाबुद्धिका विनाशक है. यह कल्पना करनी पडती है ।

न चापेक्षाबुद्धिनाशात्कथं द्वित्वनाश इति वाच्यम् । कालान्तरे द्वित्वप्रत्यक्षाभावादपेक्षाबुद्धिस्तदुत्पादिका तन्नाशस्तन्नाशक इति कल्पनात् ।

शंका-अपेक्षाबुद्धिसे विनाशके पीछे द्वित्वादिका विनाश कैसे होता है ? समाधान-अपेक्षाबुद्धिके असत्त्वकालमें द्वित्वादिधर्मोंका साक्षात्कार नहीं होता इसलिये यह निश्चय होता है कि-अपेक्षाबुद्धिही द्वित्वादि धर्मोंको उत्पन्न करनेवाली है और अपेक्षाबुद्धि विनाशही उन द्वित्वादि धर्मोंका विनाशक है ।

अतएव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते ।

भाषा-(अतएव) पूर्वोक्त युक्तिसे अपेक्षाबुद्धिको अवश्य द्वित्वादिउत्पादिकता है; इसीलिये यह भी कल्पना होती है कि-उस उस पुरुषकी अपेक्षाबुद्धिसे उत्पन्न हुए द्वित्वादिको वही वही पुरुष ग्रहण करसकता है; दूसरा नहीं.

न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षे कारणत्वमस्त्विति वाच्यम्, लाघवेन द्वित्वं प्रति कारणत्वस्यैवोचितत्वात् । अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनाम्, सर्गादिकालीनपरमाण्वादावीश्वरीयापेक्षाबुद्धिर्ब्रह्माण्डान्तरवर्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति।

शंका--अपेक्षाबुद्धिसे यदि द्वित्वादि उत्पत्तिके प्रति कारणता न माने किन्तु केवल द्वित्वादि प्रत्यक्षके प्रतिही कारणता मानें तो हानि क्या है ? समाधान-लाघवानुरोधसे द्वित्वादिके प्रतिही अपेक्षाबुद्धिको कारणता माननी उचित है अर्थात् ' द्वित्वप्रत्यक्षत्व ' की अपेक्षासे ' द्वित्वत्व ' रूप धर्मको कार्यतावच्छेदक माननेमें लाघव है. द्व्यणुकादि अतीन्द्रियपदार्थोंमें योगी लोगोंकी अपेक्षाबुद्धि होती है. सृष्टिके आदिकालमें परमाणुआदिकोंमें ईश्वरकी अपेक्षाबुद्धि होती है अथवा दूसरे ब्रह्माण्डमें होनेवाले योगीलोगोंकी अपेक्षाबुद्धि द्वित्वादिका कारण होती है-इति ।

अपेक्षाबुद्धिः केत्यत आह, अनेकेति-

शंका-वह अपेक्षाबुद्धि कैसी होती है ?

अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरुच्यते ॥

समा०-अनेक पदार्थोंमें एकत्वअवगाहन करनेवाली बुद्धिका नाम ' अपेक्षाबुद्धि ' है.

अयमेकोऽयमेकः इत्याकारिकेत्यर्थः । इदं तु बोध्यम् । यत्रानियतैकत्वज्ञानं तत्र द्वित्वादिभिन्ना बहुत्वसंख्योत्पद्येत यथा सेनावनादाविति कन्दलीकारः ।

भाषा-अर्थात् अनेक पदार्थोंमें " अयमेकोऽयमेकः " इत्याकारक बुद्धिका नाम ' अपेक्षाबुद्धि ' है. यहांपर यह भेदभी जानने योग्य है कि, 'कन्दली' नामक ग्रंथका कर्ता श्रीधर पंडित तो यह कहता है कि--जिस स्थलमें एकत्वका ज्ञान अनियत है अर्थात् नियमपूर्वक नहीं होता उस स्थलमें द्वित्वादि भिन्न बहुत्वसं-

ख्याकी उत्पत्ति होती है. जैसे सेना सभादि पुरुषसमूहमें या वनवाटिकादि वृक्षस-
मूहमें एकत्वज्ञान अनियत है; इसलिये इत्यादि स्थलोंमें द्वित्वादिभिन्न बहुतसं-
ख्याकी उत्पत्ति होती है-इति

आचार्यास्तु त्रित्वादिकमेव बहुत्वं मन्यन्ते, तथाच त्रित्वत्वादिव्यापिका बहुत्वत्वजातिर्नातिरिच्यते । सेनावनादौ चोत्पन्नेऽपि त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात् ।

भाषा-और उदयनाचार्य तो यह कहते हैं कि-त्रित्वादिहीका नामान्तर 'बहुत्व' है, बहुत्व कोई त्रित्वादिसे पृथक् धर्म नहीं है. एवं त्रित्वत्वादि धर्मोंकी व्यापकीभूता बहुत्वत्वरूपा जातिभी कोई अतिरिक्त नहीं है. सेनावनादिकोंमें भी त्रित्वादि उत्पन्न तो होते हैं परन्तु उनमें नियतानेक एकत्वज्ञानाभावरूप दोषके प्रभावसे त्रित्वत्वादि धर्मोंका ग्रहण नहीं होता.

इत्थं च 'इतो बहुतरेयं सेना' इति प्रतीतिरुपपद्यते, बहुत्वस्य संख्यान्तरत्वे तु तत्तारतम्याभावान्नोपपद्येतेत्यवधेयम् ॥

भाषा-(इत्थञ्च) ऐसे मन्तव्यसे ' इतो बहुतरेयं सेना ' अर्थात् इस सेनासे इस द्वितीय सेनाके बहुत्वम स्वसजातीयनिरूपित उत्कर्ष प्रतीत होता है. इस प्रतीतिकीभी उपपत्ति हो सकती है; परन्तु यदि बहुत्वको त्रित्वादिसे संख्यान्तर मानें तो उसकी अपने आपमें न्यून अधिकता कुछ नहीं बन सकती, इसलिये " इतो बहुतरेयं सेना " इस प्रतीतिका उपपन्न होना दुर्घट है--इति ।

परिमाणं निरूपयति, परिमाणमिति-

भाषा-'परिमाणं' इत्यादि ग्रन्थसे मूलकार परिमाणका निरूपण करते हैं--

परिमाणं भवेन्मानव्यवहारस्य कारणम् ॥ १०९ ॥
अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः ॥

भाषा-मानव्यवहारके कारणीभूतका नाम ' परिमाण ' है ॥ १०९ ॥ वह परिमाण अणु दीर्घ महत् तथा ह्रस्व भेदसे चार प्रकारका है.

परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः ॥ १०९ ॥ तच्चतुर्विधम् अणु महद्दीर्घं ह्रस्वं च । इदं चातुर्विध्यं प्रत्यक्षसिद्धम् । तत्राणुत्वह्रस्वत्वे महत्त्वदीर्घत्वे समनियते ।

भाषा-अर्थात् "इदम् अणु, इदम् महत्" इत्याकारक जो (परिमिति) परिमापण

रूप व्यवहार उसका असाधारण कारणीभूत परिमाण है ॥१०९॥ वह अणु महत् दीर्घ तथा ह्रस्वभेदसे चार प्रकारका है. यह चारों प्रकारका प्रत्यक्ष अनुभवसे सिद्ध है. उनमें अणुत्व ह्रस्वत्व तथा महत्त्व दीर्घत्व ये दो दो आपसमें समनियत रहते हैं. भाव यह कि इन चारों प्रकारके परिमाणको पहले परम मध्यम भेदसे दोप्रकारका जानना चाहिये. उनमें परमअणुत्व तथा परमह्रस्वत्व परमाणुओंमें तथा मनमें है. एवं मध्यम अणुत्व तथा मध्यमह्रस्वत्व द्व्यणुकमें है. एवं परममहत्त्व तथा परम-दीर्घत्व गगनादिकोंमें है और मध्यममहत्त्व तथा मध्यमदीर्घत्व घटादि पदार्थोंमें है. इस रीतिसे ये दो दो परस्पर समनियत हैं.

अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ११०॥
संख्यातः परिमाणाच्च प्रचयादपि जायते ॥
अनित्यं-

भाषा-वह परिमाण घटपटादि अनित्यपदार्थोंमें अनित्य है तथा गगनादि नित्य-पदार्थोंमें नित्य है ॥ १२० ॥ इनमें अनित्यपरिमाणकी संख्यासे परिमाणसे तथा (प्रचय) शिथिलारूप संयोगसे उत्पत्ति होती है.

तत्परिमाणम् । नित्यमित्यत्र परिमाणमित्यनुषज्यते । जायत इत्यत्रापि परिमाणमित्यनुवर्तते । अनित्यमिति पूर्वेणान्वितम् । तथाचानित्यं परिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः ।

भाषा-मूलपठित 'तत्' शब्दसे परिमाणका ग्रहण है, एवं 'नित्यम्' इस पदके साथ 'परिमाणम्' इस पदका पूर्वकारिकासे अनुवर्तन करके सम्बन्ध करना. एवं ' जायते ' इस क्रियापदके साथभी 'परिमाणम्' इस पदका पीछेसे सम्बन्ध करना कारिकाके उत्तरार्द्धके आदिमें पठित 'अनित्य' पदका पूर्व पदोंके साथ अन्वय है. एवं यह अर्थ हुआ कि-अनित्यपरिमाण संख्याजन्य परिमाणजन्य तथा प्रचयजन्य होनेसे तीन प्रकारसे उत्पन्न होता है.

तत्र संख्याजन्यमुदाहरति, द्व्यणुकादाविति-

भाषा-उनमें 'द्व्यणुकादौ' इत्यादि ग्रन्थसे संख्याजन्यको दिखलाते हैं-

-द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ॥ १११ ॥

भाषा-द्व्यणुकादिकोंका परिमाण संख्यासे उत्पन्न होताहै ॥ १११ ॥

द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकपरिमाणं वा न कारणम् । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् । द्व्यणुकादिपरिमाणं तु परमाण्वणुत्वापेक्षया नोत्कृष्टम्, त्रसरेणुपरिमाणं तु न सजातीयम्, अतः परमाणौ द्वित्वसङ्ख्या द्व्यणुकपरिमाणस्य, द्व्यणुके त्रित्वसङ्ख्या च त्रसरेणुपरिमाणस्य समवायिकारणमित्यर्थः ॥ १११ ॥

भाषा-द्व्यणुकके या त्रसरेणुके परिमाणके प्रति परमाणु परिमाणको या द्व्यणुक परिमाणको कारणता नहीं है; क्योंकि परिमाणको नियमसे स्वसमानजातीय उत्कृष्ट परिमाणजनकता है. भाव यह कि-परिमाणका यह स्वभाव है कि, यह अपनेसे उत्कृष्ट परिमाणहीका जनक होताहै और द्व्यणुकादिका परिमाण तो परमाणुके अणुत्वकी अपेक्षासे कुछ उत्कृष्ट नहीं है और त्रसरेणुका परिमाण परमाणुपरिमाणका सजाति नहीं है क्योंकि त्रसरेणुका परिमाण इन्द्रियग्राह्य होनेसे मध्यममहत् है तथा परमाणुका परिमाण परम अणु है इसलिये परमाणुद्वयगत द्वित्वसंख्या द्व्यणुकपरिमाणके प्रति तथा द्व्यणुक तीनगत त्रित्वसंख्या त्रसरेणुपरिमाणके प्रति असमवायिकारण है; यही मानना उचित है ॥ १११ ॥

परिमाणजन्यमुदाहरति, परिमाणं घटादाविति-

भाषा-एवं 'परिमाणं' इत्यादि ग्रन्थसे परिमाणजन्य परिमाणको दिखलाते हैं.

परिमाणं घटादौ तु परिमाणजमुच्यते ।

परिमाणजं कपालादिपरिमाणजन्यम् ।

भाषा-घटादिगत परिमाणके प्रति कपालादिगत परिमाणको असमवायि कारणता है.

प्रचयजन्यमुदाहर्तुं प्रचयं निर्वक्ति, प्रचय इति-

भाषा-एवं प्रचयजन्य परिमाण प्रदर्शनार्थ पहले 'प्रचयः' इत्यादि ग्रन्थसे प्रचयको दिखलाते हैं.

प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते॥११२॥
परिमाणं तूलकादौ-

भाषा-'प्रचय' नाम शिथिलाख्य संयोगका है ॥ ११२ ॥ उस संयोगसे (तूल) रूई आदिकोंमें परिमाणान्तरकी उत्पत्ति होती है.

परिमाणं चाश्रयनाशादेव नश्यतीत्याह, नाश इति–

भाषा–उस परिमाणका स्वाश्रय नाश होनेसे नाश होताहै; इसीको 'नाशस्तु' इत्यादि ग्रन्थसे कहते हैं.

–नाशस्त्वाश्रयनाशतः ॥

अर्थात् परिमाणस्यैव ।

भाषा–उस परिमाणका अपने आश्रयद्रव्यके नाश होनेसें नाश होताहै अर्थात् आश्रयद्रव्यके नाशमात्रसे केवल परिमाणहीका नाश होता है, गुणान्तरका नहीं.

न चावयविनाशः कथं परिमाणनाशकः, सत्यप्यवयविनि त्रिचतुरादिपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम् ।

शंका–अवयवीका नाश उसके परिमाणका नाशक तो नहीं बनसकता; क्योंकि पटादि अवयवी बनाभी रहे परन्तु यादि उनमेंसे तीन चार (परमाणु) हिस्से अर्थात् तन्तु आदि निकाल लिये जायँ अथवा और डालदिये जायँ तो 'यह वही पट है' इत्यादि प्रत्यभिज्ञाज्ञान उसमें होनेसेभी उसका परिमाणान्तर होजाताहै;यह वार्ता तो प्रत्यक्ष अनुभवसिद्ध है अर्थात् ऐसे स्थलमें अवयवीनाशरूप कारणके न होनेपरभी परिमाणनाशरूप कार्य देखनेमें आया; इसलिये व्यतिरेकव्यभिचार हुआ.

परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च त्र्यणुकनाश इत्येवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् । सति च नाशकेऽनभ्युपगममात्रेण नाशस्यापवदितुमशक्यत्वात् । शरीरादाववयवोपचयेऽसमवायिकारणनाशस्यावश्यकत्वादवयविनाश आवश्यकः ।

समाधान–परमाणुद्वयके विश्लेषसे द्व्यणुकका विनाश तो आपको स्वीकृतही होगा, एवं द्व्यणुकके नाश होनेसे त्रसरेणुका नाशभी माननेही योग्यहै; इसी क्रमसे महाअवयवीपर्यन्त विनाशका विचार अवश्य करना उचित है इस क्रमसे यदि परिमाणका विनाशक अवयवीनाशही बुद्धिमें आजाय तो केवल उसके नाश स्वीकारकरणमात्रसे आप अवयवीनाशका अपलाप नहीं करसकते, असमवायिकारणके विनाशसे कार्यका विनाश नियमसे होताहै. एवं शरीरादिकोंमेंभी (अवयव) अङ्गोंके

बढहनेसे शरीरके असमवायिकारण अवयवसंयोगका विनाश अवश्य होताहै, इसलिये अवयवी शरीरका विनाशभी अवश्य मानना चाहिये.

न च पटविनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं न स्यादिति वाच्यम्। तत्रापि वेमाद्यभिघातेनासमवायिकारणतन्तुसंयोगनाशात् पटनाशस्यावश्यकत्वात्।

शंका-दोचार तन्तुओंके निकलनेसे पटके विनाश होनेपरभी उस पटमें यदि तन्तु अन्तरका संयोग होय तो वही पट अधिक परिमाणवाला होजाताहै, वह नहीं हुआ चाहिये. समाधान-ऐसे स्थलोंमेंभी वेमादिके अभिघातारूय संयोगसे पटका असमवायिकारण जो परस्पर तन्तुद्वयसंयोग उसका नाश होताहै इसलिये पटका विनाश भी अवश्यही मानना चाहिये.

किंच तन्त्वन्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात्, तन्त्वन्तररूपकारणाभावात्। तन्त्वन्तरस्यावयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत्।

भाषा-(किञ्च) तन्तुअन्तरभी यादि उसी पूर्वपटके अवयवही मान लिये जांय तो उन तन्तुओंके सम्बन्धसे पहले वह पटही नहीं होना चाहिये, क्योंकि स्वसम्बन्धसे प्रथम तन्तुअन्तररूप कारण विद्यमानही नहींहै और यदि तन्तुअन्तरको उस पटका (अवयव) समवायिकारणही नहीं माने तो उनसे पटपरिमाणके अधिक होनेकी संयुक्तद्रव्यकी तरह शंकाही नहीं होसकती अर्थात् जैसे घटपटादिके परस्पर संयोगसे घटके या पटके परिमाणको अधिक कोई नहीं मानता किन्तु संयुक्तमात्र व्यवहार करतेहैं वैसेही तन्तुअन्तरके सम्बन्धसे प्रथम पटमेंभी समझना चाहिये.

तस्मात्तत्र तत्वन्तरसंयोगे सति पूर्वं पटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्यम्। अवयविनः प्रत्यभिज्ञानं तु साजात्येन दीपकलिकादिकवत्।

भाषा-इसलिये ऐसे स्थलमें यही सिद्धान्त अवश्य मानना उचित है कि तन्तु अन्तरके संयोग होनेसे उस पूर्वपटका विनाश हुआहै और नूतन पटान्तरकी उत्पत्ति हुई है. एवम् "स एवायं पटः" इत्यादि प्रत्यभिज्ञाज्ञानका निर्वाह दीपशिखाकी तरह सजातीयके अवगाहन करनेवाला समझना चाहिये अर्थात् जैसे क्षण २ में बदलती हुई दीपशिखामें "यह वही दीपशिखा प्रज्वलित है" इत्यांकारक साजात्यावलम्बी प्रत्यय लोकमें सर्वानुभवसिद्ध है वैसेही प्रकृतमें भी जानना चाहिये.

न च पूर्वतन्तव एव तन्त्वन्तरसहकारात् पूर्वपटे सत्येव पटान्तरमारभन्तामिति वाच्यम्। मूर्तयोः समानदेशताविरोधात्। एकदा नानाद्रव्यस्य तत्रोपलम्भस्य बाधितत्वाच्च। पूर्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यस्यावश्यमभ्युपेयत्वात्।

शंका–प्रथम तन्तुही यदि और तन्तुओंकी सहकारतासे पहले पटके रहनेपरभी दूसरे पटको उत्पन्न करें तो क्या दोष है? समाधान–दो मूर्तद्रव्य समान एक देशमें नहीं रहसकते अर्थात् मूर्तद्रव्य देशका प्रतिरोधक होता है, इसलिये दो मूर्त एक देशमें नहीं रह सकते और ऐसे स्थलमें एकही वार नानाद्रव्यकी उपलब्धिभी नहीं होती अर्थात् एकही पटादि पदार्थ एकही कालमें दोतरहका कभी किसी पुरुषको दिखाई नहीं दिया इसलिये उत्तरद्रव्यकी उत्पत्तिमें प्रतिबन्धकरूप पूर्वद्रव्यके विनाश होनेसे द्रव्यान्तरकी उत्पत्ति होती है; इस वार्ताको अवश्य मानना चाहिये.

पृथक्त्वं निरूपयति, संख्यावदिति–

भाषा–एवं 'संख्यावत्' इत्यादि ग्रन्थसे पृथक्त्वका निरूपण करते हैं–

संख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणम्॥११३॥

भाषा–पृथक्प्रत्ययका कारणीभूत पृथक्त्वगुणभी संख्याकी तरहही जानना चाहिये ॥ ११३ ॥

पृथक्प्रत्ययासाधारणं कारणं पृथक्त्वम्। तन्नित्यतादिकं संख्यावत्। तथाहि। नित्येष्वेकत्वं नित्यमनित्येष्वनित्यम् अनित्यमेकत्वं स्वाश्रयद्वितीयक्षणे चोत्पद्यते आश्रयनाशान्नश्यति। तथैकपृथक्त्वमपि। द्वित्वादिवच्च द्विपृथक्त्वादिकमपीत्यर्थः॥ ११३ ॥

भाषा–अर्थात् "अयम् अस्मात् पृथक्" इत्याकारक प्रत्ययका असाधारण कारण 'पृथक्त्व' है उसके नित्य अनित्य होनेका विचार संख्याकी तरह जानना चाहिये. (तथाहि) अर्थात् जैसे नित्यपदार्थोंमें एकत्व नित्य है और अनित्योंमें अनित्य है और वह अनित्य एकत्व अपने आश्रयमें स्वाश्रयकी उत्पत्तिसे दूसरे क्षणमें उत्पन्न होता है, एवं स्वाश्रयनाशहीसे नाश होता है. वैसेही पृथक्त्वकोभी जानना चाहिये. एवं पूर्वोक्त द्वित्वादिकोंकी तरह द्विपृथक्त्वादिकोंका उत्पत्तिविनाशभी जानलेना चाहिये अर्थात् अपेक्षाबुद्धिरूप निमित्तकारणसे इनकी उत्पत्ति है तथा अपेक्षाबुद्धि आदिके विनाशसे इनका विनाश है ॥ ११३ ॥

ननु, 'अयमस्मात् पृथग्' इत्यादावन्योन्याभावो भासते तत्कथं पृथक्त्वं गुणान्तरं स्वीक्रियते, नचास्तु पृथक्त्वं, न त्वन्योन्याभाव इति वाच्यम्, रूपं न घट इति प्रतीत्यनापत्तेः। न हि रूपे घटावधिकं पृथक्त्वं गुणान्तरमस्ति, न वा घटे घटावधिकं पृथक्त्वमस्ति येन परम्परासम्बन्धः कल्प्य इत्यत आह, अन्योन्याभावात् इति।

शंका–"अयमस्मात् पृथक्" इत्यादि प्रतीतिमें अन्योन्याभावका भान होता है इसलिये इस प्रतीतिसे पृथक्त्वको गुणान्तर मानना योग्य नहीं और यदि कहो कि पृथक्त्वके गुणान्तर माननेसे सर्वत्र निर्वाह हो सकता है इसलिये अन्योन्याभाव माननेकी आवश्यकताही नहीं तो यहभी ठीक नहीं, क्योंकि यदि अन्योन्याभावप्रतीति सिद्ध न होय तो "रूपं न घटः" यह प्रतीति नहीं हुई चाहिये. भाव यह कि–इस प्रतीतिका निर्वाह पृथक्त्वसे नहीं होसकता; क्योंकि रूपमें घटात्मक अवधिको लेकर कोई पृथक्त्वनामक गुणान्तर नहीं है और घटमें स्वात्मक अवधिको लेकरभी पृथक्त्व नहीं रहता जिससे 'सामानाधिकरण्य' रूप परंपरासम्बन्धकी कल्पनासे उक्त प्रतीतिका निर्वाह किया जाय इसी भावको लेकर मूलकार 'अन्योन्य' इत्यादि अग्रिम ग्रन्थको कहते हैं–

विलक्षणेति। ननु शब्दवैलक्षण्यमेव न त्वर्थवैलक्षण्यमिति चेत् न। विनाऽर्थभेदं घटात् पृथगितिवत् घटो न पटः इत्यत्रापि पञ्चमी स्यात्। तस्मात् यदर्थकयोगे पञ्चमी सोऽर्थो नञर्थाऽन्योन्याभावतो भिन्नो गुणान्तरं कल्प्यत इति॥ ११४॥

समाधान–इस पृथक्त्वात्मकगुणकी अन्योन्याभावसे चरितार्थता नहीं होती; क्योंकि "अयमस्मात् पृथक्" इससे "इदमिदं न" यह प्रतीति विलक्षण है॥११४॥

अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते॥
अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा॥ ११४॥

शंका–इन दोनों प्रतीतियोंमें परस्पर केवल शब्दमात्रकी विलक्षणता है किन्तु अर्थभेद नहीं है. समाधान–यदि अर्थभेद न होय जैसे "घटात् पृथक्" इस प्रयोगमें पञ्चमीविभक्ति हुई है, वैसे 'घटो न पटः' इस प्रयोगमेंभी पञ्चमी होनी चाहिये. भाव यह कि–यदि'नञ्' तथा'पृथक्'अव्यय इन दोनोंका एकही अर्थ होय तो

जैसे पृथक्के योगसे "पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् २ । ३ । ३२ " इस सूत्रसे पञ्चमीआदि विभक्ति होती है; वैसेही 'नञ्' के योगमें भी होनी चाहिये; परन्तु किसी स्थलमें भी विधानके न होनेसे होती नहीं है. इसलिये दोनोंका एक अर्थ मानना भी उचित नहीं है; इसलिये यह निश्चय करना चाहिये कि जिस अर्थके योगमें पञ्चमी हुई है, वह अर्थ नञ् अर्थ अन्योऽन्याभावसे भिन्न अवश्य कोई गुणान्तर है--इति ॥ ११४ ॥

संयोगं निरूपयति, अप्राप्तयोरिति-

भाषा-एवम् 'अप्राप्तयोः' इत्यादि ग्रन्थसे मूलकार संयोगका निरूपण करते हैं--

अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः ॥

तं विभजते, कीर्तित इति-

कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥ ११५ ॥
तथोभयक्रियाजन्यो भवेत्संयोगजोऽपरः ॥

एष संयोगः ॥ ११५ ॥

आदिमः श्येनशैलादिसंयोगः परिकीर्तितः॥११६॥
मेषयोः सन्निपातो यः स द्वितीय उदाहृतः ॥
कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः ॥ ११७ ॥
तृतीयः स्यात्-

भाषा-अप्राप्त द्रव्योंके परस्पर (प्राप्ति) मिलापका नाम 'संयोग' है; वह संयोग तीन प्रकारका है. उनमें प्रथम अन्यतर क्रियासे उत्पन्न होता है ॥ ११५ ॥ दूसरा उभयक्रियासे उत्पन्न होता है और तीसरा संयोगसे संयोग उत्पन्न होता है, इनमें प्रथम पर्वत पक्षी आदिकोंका संयोग है अर्थात् पर्वत अचल है, केवल पक्षी-आदिकी क्रियासे पर्वतमें संयोग होता है ॥ ११६ ॥ एवं परस्पर (मेष) मेढेआ-दिका (सन्निपात) टक्कर लगानारूप दूसरा संयोग है अर्थात् ऐसा संयोग उभ-यत्र क्रिया हो तो होता है. एवं कपालवृक्षके संयोगसे होनेवाला घटवृक्षका संयोग ॥ ११७ ॥ तीसरा संयोग है.

सन्निपातः संयोगः । द्वितीय उभयकर्मजः ॥ ११६ ॥ ११७ ॥

तृतीय इति, संयोगज इत्यर्थः।तृतीयः स्यादिति च पूर्वेणान्वितम्।

भाषा--मूलमें ' सन्निपात ' यह शब्द संयोगका वाचक है. एवं द्वितीय शब्द उभयक्रियाजन्य संयोगपर है ॥ ११५ ॥ ११६ ॥ ११७ ॥ (तृतीय इति) अर्थात् संयोगसे उत्पन्न होनेवाला संयोग मूलघटित 'तृतीयः स्यात्' इस भागका पूर्वले पदोंके साथ अन्वय है.

-कर्मजोऽपि द्विधैव परिकीर्तितः ॥
अभिघातो नोदनं च शब्दहेतुरिहादिमः ॥ ११८ ॥
शब्दाहेतुर्द्वितीयः स्यात्-

भाषा--वह क्रियाजन्य संयोग फिर दो प्रकारका है. एक अभिघाताख्य संयोग है; और दूसरा नोदनाख्य है. जिस संयोगके होनेसे शब्द होय वह अभिघाताख्य संयोग है ॥ ११८ ॥ एवं जिसके होनेसे शब्द न होय वह नोदनाख्य संयोग है.

आदिमोऽभिघातः ॥ ११८ ॥ द्वितीयो नोदनाख्यः संयोग इति ।

भाषा--मूलमें ' आदिम ' शब्दसे अभिघाताख्य संयोगका ग्रहण है ॥ ११८ ॥ तथा ' द्वितीय ' शब्दसे नोदनाख्यसंयोगका ग्रहण है.

विभक्तप्रत्ययासाधारणं कारणं विभागं निरूपयति, विभाग इति-

भाषा--एवम् ' विभाग ' इत्यादि ग्रन्थसे विभक्तप्रत्ययके असाधारण कारणीभूत विभागका निरूपण करते हैं--

-विभागोपि त्रिधा भवेत् ॥
एककर्मोद्भवस्त्वाद्यो द्व्यकर्मोद्भवोऽपरः ॥ ११९ ॥
विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् ॥
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥ १२० ॥

भाषा--एवं संयोगकी तरह विभाग भी तीन प्रकारका है. उनमें प्रथम एककी क्रियासे उत्पन्न होता है; दूसरा दोनोंकी क्रियासे उत्पन्न होता है ॥ ११९ ॥ और तीसरा विभागसे विभाग उत्पन्न होता है. वह तीसरा फिर दो प्रकारका है. पहला केवल कारणमात्रके विभागसे उत्पन्न होता है और दूसरा कारणाकारण उभयके विभागसे उत्पन्न होता है ॥ १२० ॥

एककर्मेति । उदाहरणं तु श्येनशैलविभागादिकं पूर्ववद्बोध्यम् ॥ ॥ ११९ ॥ तृतीयो विभागजः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति । आद्यस्तावत्-यत्र कपाले कर्म ततः

कपालद्वयविभागस्ततो घटारम्भकसंयोगनाशस्ततो घटनाशस्ततस्तेनैव कपालविभागेन स्वकर्मणः कपालस्याकाशविभागो जन्यते, तत आकाशसंयोगनाशः, तत उत्तरदेशसंयोगस्ततः कर्मनाश इति।

भाषा–तीनों प्रकारके विभागके उदाहरणभी पीछे लिखे तीनों प्रकारके संयोगकी तरहही जानने चाहिये अर्थात् श्येन शैलादिका विभाग अन्यतरक्रियाजन्य है तथा मेषद्वयका विभाग उभयक्रियाजन्य है और तीसरा विभागजविभाग दोप्रकारका है. एक कारणमात्र विभागजन्य है, दूसरा कारणाकारणविभागजन्य है; उनमें प्रथमका उदाहरण जैसे पहले कपालमें क्रिया हुई उस क्रियासे कपालद्वयका विभाग हुआ, उस विभागसे पीछे घटके आरम्भक कपालद्वयके संयोगका विनाश हुआ पीछे घटका नाश हुआ उससे पीछे उसी कपालद्वयविभागसे पूर्वोक्त क्रियायुक्त कपालका आकाशके साथ विभाग उत्पन्न होता है;उससे पीछे आकाशसंयोगका विनाश होता है उससे पीछे कपालका उत्तर देशके साथ संयोग होता है. उससे पीछे कपालगत क्रियाका विनाश होता है–इति।

न च तेन कर्मणैव कथं देशान्तरविभागो न जन्यत इति वाच्यम्। एकस्य कर्मणा आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात्।

शंका–उस कपालद्वयविभागजनक प्रथमक्रियाहीसे यादि (देशान्तर) कपालाकाशादि विभागभी मान लिया जाय तो हानि क्या है ? अर्थात् वह प्रथमक्रियाही कपालाकाशादि देशान्तर विभागकोभी उत्पन्न क्यों नहीं करती ? उसके लिये जुदा कपालद्वयविभागमें कारणता कल्पनेकी कौन आवश्यकता है. समाधान–एक क्रियामें (आरम्भकसंयोग) कपालद्वय संयोगादिविरोधि विभागजनकता तथा (अनारम्भकसंयोग) कपालाकाशसंयोगादि विरोधिविभागजनकता नहीं रहती क्योंकि इन दोनों धर्मोंका परस्पर विरोधहै.

अन्यथा विकसत् कमलकुड्मलभङ्गप्रसङ्गात्।

भाषा–(अन्यथा) यदि आरम्भकसंयोगविरोधि विभागजनक क्रियाको तथा अनारम्भकसंयोगविरोधि विभागजनक क्रियाको एकही मानें तो विकसत्कमलके कुडमलका भङ्ग हो जाना चाहिये अर्थात् खिलते हुए कमलकी डोडी टूट जानी चाहिये. यहां भाव यह है कि-खिलतेहुए कमलमें अग्रावच्छेदेन अनारम्भक संयोगके विरोधिविभागकी जनिका क्रिया है,उसी क्रियासे यदि मूलावच्छेदेन आरम्भकसंयो-

गविरोधिविभागभी मान लिया जाय तो उस विभागसे कमलके आरम्भकसंयोगके नाश होनेके पश्चात् कमलका विनाशभी हुआ चाहिये परन्तु ऐसा होता देखनेमें नहीं आता.

तस्माद्यदीदमनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत्, तदा आरम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयेत् ।

भाषा-इसलिये आरम्भकसंयोगविरोधि विभागजनक क्रियाको तथा अनारम्भक-संयोगविरोधि विभागजनक क्रियाको एक मानना उचित नहीं है; किन्तु यही मानना उचित है कि क्रिया जिस कालमें अनारम्भकसंयोगविरोधि विभागको उत्पन्न करती है उस कालमें आरम्भक संयोगके विरोधिविभागको नहीं उत्पन्न करती.

न च कारणविभागेनैव द्रव्यनाशात्पूर्वं कुतो देशान्तरविभागो न जन्यत इति वाच्यम् । आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागसम्भवात् । १ ।

शंका-कारणविभागहीसे अर्थात् कपालद्वयविभागादिहीसे घटादि द्रव्यनाशसे पहले देशान्तरविभागभी क्यों नहीं उत्पन्न होता?यदि होता है तो "ततो घटनाशः, ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याकाशविभागो जन्यते" यह पूर्वकथन आपका असङ्गत होगा.समाधान-कपालद्वय विभागादिसे घटादिद्रव्यनाशके पहले देशान्तर विभाग उत्पन्न नहीं होसकता; क्योंकि आरम्भसंयोगके (प्रतिद्वंद्वि) विरोधि-विभागवाले कपालादि अवयवका (सति द्रव्ये) द्रव्यनाशके विना देशान्तरके साथ विभाग होना असम्भव है १ ।

